॥श्रीगणेशाय नमः॥ शिवं च विघ्नकर्तारं गुरुं च वामनं तथा॥ अंबिकीशं स्कंदं चापि वंदे विघ्नोप
शांतये॥१॥ कात्यायनकृते श्राद्धसूत्रे भाष्या मुरुसारम्॥ भर्योऽपद्धतिं कुर्वे याज्ञवल्क्यादि
संमतां॥२॥ तत्र पूर्वां पौर्णमासीमुत्तरां वीपवसेदिमादिना श्रौतकर्मणामुपदिष्टत्वात् अतो मध्ये
स्थालीपाकानां कर्मत्वादिनास्मात्तन्निष्पाद्यामाऽवशिष्टं श्राद्धकर्म कर्त्तव्यमित्यत आह
॥ ॥ अपरपक्षे श्राद्धं कुर्वीत॥ ॥श्राद्धमिति कर्मणो नामधेयं॥ तत्र कर्कमते पिंडदानसंबे
व श्राद्धमिति नामधेयं॥ ततश्च पिंडदानाकरणे श्राद्धन्निःपिंडदानब्राह्मणभोजनात्मकेऽर्कणां नां
त्रयाणां कर्मणां समुदायप्येसन्ये॥ श्राद्धशब्दः स्फुटीकृतो ब्रह्मांडे। देशे काले च पात्रे च श्र
द्धया विधिना च यत्। पितृनुद्दिश्य विप्रेभ्यो दानं श्राद्धमुदाहृतमिति। अपरपक्ष इति कृष्ण
पक्ष उच्यते॥ समाधानं॥ ॥समाचरंति ह कस्मै श्राद्धमिति लिंगाद्वा। यो ऽपक्षीयते स पित
रति। अत्र यद्यपि समस्तमाससंबंध्यपरपक्षस्य श्राद्धकालत्वं प्रतीयते तथापि स्मृत्यंत
रे दर्शनात् कन्याकुंभसंबंधिनो विशिष्टत्वं। तत्रापि कन्यासंबंधिनः मुख्यत्वं। तथा च म
नुः॥ अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत्॥ हेमंतग्रीष्मवर्षासु पांचयज्ञिकमन्वहं॥ कृ

१

त्वेपेत्तया हेमंतग्रीष्मवर्षासु शितिम इत्युक्तं तद्विवेचितं मत्स्यपुराणे अनेनविधिना श्राद्धं त्रिरब्दस्ये
ह निर्वपेत् ॥ कन्याकुंभवृषस्थे च कृष्णपक्षेषु सर्वदा ॥ कन्यासंबंधितिकृष्णपक्षे विशेषः ॥
तस्याः उभयपक्षं कीर्तनमस्ति ॥ प्रोष्ठपदापरपक्षत्वेन कन्याप्राप्युकृष्णपक्षत्वेन ॥
तथा च विष्णुधर्मोत्तरे मासि इषे परः उत्तरपक्षमनाश्राद्धे श्रेष्ठं यस्मात् ददाति पितॄणां । चातुर्मास्यं तत
त्रापि प्रस्तुते केशवेधिकं । प्रोष्ठपदापरपक्षस्तत्रापि च विशेषः । पंचमप्रभृतिं तत्राप्यदश
म्प्रभृति तोष्यंति । शास्त्रात्रयोदशी एजन्माघायुक्ता ततोधिका । यत्प्रोक्तं त्रापुक्तं । प्रोष्ठपदा
मतीतायां मघायुक्तां त्रयोदशीं ॥ प्राप्य श्राद्धं हि कर्तव्यं मधुना पायसेन तु ॥ ब्रह्मपुराणे
॥ ॥ आश्वयुक्कृष्णपक्षस्य श्राद्धं कार्यं दिने दिने । त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा
॥ आश्वयुज्यां कृष्णपक्षे पौर्णमास्यां मघासु च ॥ माद्रतो पमः श्रेयान् पितृभ्यो पिपमालप
मिति ॥ त्रिभागहीनमिति प्रतिपदादि चतुष्टयं वर्जयित्वा पंचम्यादि पक्ष उक्तः । त्रिभा
गमिति पक्षतृतीयभागः ॥ अनेन दशम्यादिरुक्तः । अर्द्धमित्यष्टम्यादि पक्षस्यादिकुर्या
परपक्षिकमिति स्मार्त्ताः ॥ पंचमप्रभृति तत्रापि दशम्यप्रभृतीं ततोप्यतीति विष्णुधर्मोत्तरवाक्ये

तु४

वाक्यत्वात् त्रिभागहीनं षष्ठ्यादि त्रिभागमेकादश्यादि दीपिकायां पर्वदिने एवेति मतस्य तृतीयभागार्द्ध
त्रयोदश्यादी मेवं व्याख्यानं कृतं । तत्पक्षमिमस्यानन्वयदीपापत्ते रूपेक्ष्यमिति कमलाकर
भट्टाः कुर्वीतेति विधायकं पदं ॥ ॥ अथैतदग्नौ विचार्यते ॥ ॥ किं श्राद्धे साग्निकस्यैवाधिकार
उत निरग्निकस्यापीत्यत्र कर्काचार्येण निरूपितं ॥ ॥ अग्नौकरणहूयमानस्याग्न्यधिकरण
त्वात्तदुपसंहारार्थं साग्निकस्यैवाग्नौकरणेरितस्य ॥ नचैतत्पक्षे होमो लौकिकेग्नौ विधीयत इ
ति निषेधात् ॥ अत्र च दारसंग्रहपूर्वकं कर्मविस्तष्याधानं तत्पूर्वं कावककर्मान्तरेप्रत्र त्रिरित
तोपि नैनोग्निमतोधिकार इति ॥ पत्नूक्तं ॥ अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति ॥
तदप्यकृताधानस्य स्मार्त्ताधिकविषयं । अनग्निमतोपि श्राद्धेधिकार इत्येवं विधानप्रसिद्धि
स्तकरह वरेपत्तो वसतीति वदन निश्चितमूले ति नानग्निमतः श्राद्धाधिकारे प्रमाणमिति ।
प३ नाऽऽदरमनुपपन्नं । निरग्नेर्मित्रिकेषु हि प्रयाशाकुपात्यस्या ॥ कुर्यादितिश्रामात्सर्वाणोपहा
गश्राद्धस्याप्यधिकारत् । अग्न्यभावे तु पाणौ होमविधानात् ॥ अस्य विधानस्य चोक्तवि
षयविशेषमवस्थापयः प्रमाणाभावात् । संति चाग्नौकरणरहितानि श्राद्धानि तेषु वि

२

काएनिवृत्तेश्चाश्वाप्रीमूत्रानुपनीतानामपिश्राद्धोपदेशात्साग्निकानग्निकोभयाधिकारेण विहितंश्रा
द्धमिति सिद्धमिति हेमाद्रिः ॥ अपरपक्षेप्रतिपत्प्रभृति दर्शांतं प्रत्यहं कर्तव्यमित्युक्त्वाऽधुनाप
क्षांतमाह ॥ ॥ ऊर्ध्वं वा चतुर्थ्याः ॥ वाशब्दो विकल्पार्थः ॥ चतुर्थ्याऊर्ध्वं उक्त एकालं पंचमीप्रभृ
तिवा कुर्यात् । तदुक्तं गौतमेन । अपरपक्षश्राद्धममावास्यायां पंचमीप्रभृतिवाऽपरपक्षस्येति प्र
त्युक्ततो विशेषः । कृष्णपक्षे दशम्यादौ वर्जंपित्वा चतुर्दशीं । श्राद्धे प्रशस्तास्तिथयो यथैता
न तथेतरा इति ॥ ॥ तिथिविषयकं पक्षांतरमाह ॥ यदहः संपद्येत तदहर्ब्राह्मणानामंत्र्य
पूर्वेद्युर्वा ॥ तत्र चतुर्दशीं विनाऽसर्वास्तु तिथिषु पंचम्यादिषु वा यदहर्मीस्मिन्नहनि द्रव्यब्रा
ह्मणयोः संपत्तिः स्यात्तदहस्तस्मिन्नहनि यथोदितान्ब्राह्मणानामंत्र्य श्राद्धं कुर्यात् ॥ अथ
वा यद्दिने मताहसंहितिका । तिथिरपरपक्षे स्यात्तदहे पूर्वेद्युर्वा ब्राह्मणान्निमंत्र्य श्राद्धं कुर्यादि
ति संबंधः ॥ तथा च पुराणसमुच्चये ॥ या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते ॥ सा तिथिः पैत
तपक्षस्य पूज्जनीया प्रयत्नत इति । यदहरिति विभक्त्यर्थेऽव्ययीभावः ॥ नपुंसकादन्यतरस्या
मिति टच् समासान्तः ॥ ब्राह्मणान्ग्रहणं सन्निपातादि प्रतिषेधार्थं पूर्वेद्युर्वेति व्यवस्थित विकल्पः ॥

असंभावित मिथुनानामसांदीस्तद्दहरेणमंत्रयेत । अंगानां प्रधानधर्मत्वादितिन्यायेन संभा
वितमिथुनानां पूर्वेद्युरेवेति व्यवस्था ॥ एतच्च मतं किं कृतं मार्कंडेयपुराणे निमंत्रयेत्तु पूर्वेद्यु
र्वा कांस्तु द्विजोत्तमान् । अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनः मिति लिखितः । प्रार्थयी
तश्राद्धशीलांतेभुक्तानमापितान्द्विजान् । सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवि
तव्यं भवद्भिर्नश्वोभूते श्राद्धकर्मणि ॥ अपुष्मानपक्षत्वेन पितृपूर्वं निमंत्रयेत् इति । पि
तृपूर्वकं निमंत्रणं त्वन्यशाखाविषयकं । कात्यायनमतानुवर्तिनां देवानां निमंत्रणं पूर्वं
दैवपूर्वं श्राद्धमिति वदसमाराणत्वात् पितृपूर्वं निमंत्रणमिति श्राद्धकौकारिकाकार ।
मात्स्ये विशेषः ॥ दक्षिणं जानुमालभ्य त्वं मयात्र निमंत्रितः ॥ एवं निमंत्र्य नियमान्श्रावये
त्पैतृकान्बुधः इति । एतन्मवैश्वदेवे पि योज्यपुरोहितादिर्निमंत्रणं कुर्यात् ॥ केचित्त्वशक्तस्य वैश्वदेवे
ऽति वचनात् । मतिदिन मम पक्षश्राद्धकरणे सामंतरेकतिथ्यादिदोषो नास्ति । तथा च
कार्ष्णाजिनिः । नभस्यापरपक्षे तु श्राद्धं कार्यं दिने दिने नैव नंदादिवर्ज्यस्यान्निषेवे निंद्या चतुर्दशी
॥ दशम्यादिपक्षत्रयेपि चतुर्दशी वर्जनीया ॥ कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीमनुवचनं प्राग्

त्वा चतुर्दशी मि॰

३

क्तं। स्नातकान्। आमंत्र्य श्राद्धं कुर्यादिति शेषः॥ अत्र यः स्नातकाः भवंतीत्यादिना स्नातकल
क्षणं चोक्तं कात्यायनेन। अत्र पंचा पत्नीकनिमंत्रणप्रतिषेधे प्रतिप्रसवः॥ विभार्यो वृषली
पतिरित्यत्रिणा निषिद्धत्वात्॥ ॥एकैपतीन्॥ ॥निमंत्रयंति॥ तदुक्तं संग्रहजन्मेषु
तिं श्राद्धेपि त्र्यहेणां पुष्टिका एकः॥ ब्रह्मचारी यतिश्चैव प्रजनीयोहि नित्यशः॥ तत्कृतं सक
लं यस्मात्तस्य षड्गुणमाप्नुयात्। मार्कंडेयोपि॥ भिक्षार्थमागतान्वापि कालेसंयमिनो
यतीन्। भोजयेत्प्रणिपाताद्यैः प्रसादोद्यतमानस इति॥ यतिश्च त्रिदंडी। एकदंडिनां श्रा
द्धेनिरस्तत्वात्॥ तथाहि। मुंडीजटिलकाषायान्श्राद्धेयत्नेन वर्जयेत्। शिखिभ्योधा
तुरक्तेभ्यस्त्रिदंडिभ्यः प्रदापयेत्। पतिं कुटीचरं बहूदकं चाइत्येपीः कलौनिषिद्धत्वात्।
तथाहि। दीर्घकालं ब्रह्मचर्यं वानप्रस्थाश्रमं तथा हंसः परमहंसश्च कलौनैतच्चतुष्ट
यमिति॥ ॥गृहस्थान्साधून्वा॥ ॥वाशब्दो विकल्पार्थः। पाहितिकपतिनिमंत्रणनिषेधा
र्थी वाशब्द इति केचित्। तथाचजाबालिः। अश्रं तियेन मांसानि भार्याहीनाश्च ये द्विजाः।
येच मातुलसंबंधानताञ्श्राद्धेनिवेशयेत्। साधून्सज्जनान्गृहस्थान्निमंत्रयेत्। ज

एम०
३

तथाच विष्णुपुराणे॥ साधवः क्षीणदोषास्तुते। पुराणसमुच्चये। गृहस्थः कुलसंपन्नाः प्र
ख्याताः कुलगोत्रतः। स्वदारनिरताः शांता विज्ञेयाः पंक्तिपावना इति॥ ॥श्रोत्रियान्॥ ॥नि
मंत्रयेदिति शेषः। श्रोत्रियलक्षणमाह देवलः। एकशाखां सकल्पां च षड्भिरंगैरधीत्य च।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्। कल्पसूत्रस्य ग्रहणमादरार्थं। तथाहि जन्म
नाब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥ प्र
द्धान्॥ ॥ज्ञानतपोवयोवृद्धान् निमंत्रयेदित्यर्थः। अनवद्यान्स्वकर्मस्थान्। अनवद्यान्स्व
कर्मस्थान्स्वजातिविहितकर्मानुष्ठानरतान्निमंत्रयेत्। एवं मुख्यकल्पं दर्शयित्वा॥ ॥
अभावेपि शिष्यान्स्वाचारान्॥ ॥पूर्वोक्तानां ब्राह्मणानामभावे शिष्यानप्यनपि स्वा
चारान्निमंत्रयेत्। शिष्या ब्रह्मचारिणः स्वचारनिरतिनिंद्यपरिवर्णागुरुशुश्रूषा
भिरतान्। तेषां चैकान्ननिषेधेपि वायवनिकेः श्राद्धभोजनं। यमः। अनिंद्यामंत्रितः श्रा
द्धे विप्रो घ्राणीदितः। एकान्नमविरोधेन व्रतानां प्रथमाश्रमीति। अत्रिः। कृतविकल्प
कारयोद्धेनसकुल्या ब्राह्मणा द्विजाः। वैश्वदेवे नियोक्तव्याः यद्यते गुणवत्तरा इति। एवं नि

मातृपितृवंशाद्वयविशुद्धान्स्वयमपि लोकापवादरहितान् ६

४

मंत्रणी यायानुक्ता अथ वर्ज्यानाह ॥ ॥ द्विर्नग्नस्तथा कुनखी श्यावदंतविद्रुप्रजननव्याधित व्यंगि
श्वित्रिकुष्ठिकुनखिविवर्जयेत् ॥ ॥ द्विर्नग्न इत्युक्तम् यस्य जन्मांतरे गुरुतल्पगो भूतः अथवा मे
योगी नग्योर्वेदस्याग्नेश्च विच्छेदः स द्विर्नग्नः । तदुक्तं यस्य वेदश्च वेदी च विच्छिद्येते त्रिपुरु
षं द्विर्नग्नः स तु विज्ञेयः श्राद्धकर्मणि निंदित इति श्रुक्केति गौतमः कुल्लकुष्ठी वा । विक्लिधो
दंतुरः । तथोक्तं मनुना । यस्य नैवाधरोष्ठाभ्यां छाद्यते दशनावली विक्लिधः स तु विज्ञेयो
ब्राह्मणः पंक्तिदूषणः । विक्लिधः प्रतिगंधिको गणाति । गोभिलीयश्राद्धकल्पभाष्ये । श्या
वदंत इति स्वभावात्कृष्णदंतः । विद्रुप्रजनन छिन्नलिंग चर्मादासिप्रजननेप्रसिद्धः । व्याधि
तो व्याधिपुरुषः । व्यंगो हीनांगोऽधिकांगो विरुद्धांगसंस्थितश्चेति । अतः कुब्जवक्रमुख
हस्तपादादीनां च प्रतिषेधः । सिद्धानि हीनांगोऽधिकांगश्च हीनांति रिक्तांगा इति स्मृत्यैव श्वि
त्रिश्वेतकुष्ठी । कुष्ठी गलितांगः । कुनखी कुत्सितनखः । एतान्वर्जयित्वा निमंत्रयेत् । ननु
एतावतैव अन्येषां वर्जनं भविष्यति । पदेते उपवे इत्युक्तं किमत्र द्विर्नग्रादीनां निषेधः
कृतोऽनधिकारार्थत्वात् । उच्यते । सत्यं । भवेदेव । अनिषिद्धोपदि विहिता उक्ताः स्मृत्यंतरेऽन

४

धातिरिक्तान्यमर्थान्निषेधः । किंतु विहितानां ब्राह्मणानामप्राप्तौ निषिद्धातिरिक्तानां लिक
ब्राह्मणानामस्यार्थं द्विर्नग्नादिवर्जनं । अन्यथा विहितब्राह्मणालाभे तदतिरिक्तसमस्तवर्ज
नेश्राद्धकर्मलोपस्स्यात् । तस्मात्साधूक्तं द्विर्नग्रादिवर्ज्यमिति श्राद्धानां हीतानप्युपवेश
येत् ॥ ॥ अनिंद्यो नामंत्रितो नापक्रमेत् ॥ ॥ अनिंद्यो लोकापवादरहितस्तेन श्राद्धार्थं नि
मंत्रितो नापक्रमेत् ॥ ॥ अनिंद्यो लोकापवादरहितस्तेन श्राद्धार्थं निमंत्रितो विप्रो न व्यति
क्रमं कुर्यात् । तथा चाश्रीमप्रकरणे ध्वरकांडे श्रुतिः । स होवाचानिंद्यो वै श्राद्धेषु तस्मानि
धेर्हितो न श्राद्धमपक्रमितुमिति तस्मादिहानिंद्यस्य हतो नापक्रामेदित्यनुर्योतिक्रमे दोषमा
ह । केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः । कथंचिदप्यतिक्रामन्पापः शूकरतां व्रजे
दिति । न केवलं ब्राह्मणस्यातिक्रमो दोषोपजमानस्यापि ब्राह्मणमतिक्रमे दोषः स्यात् ॥
तथा हि यमः । आमंत्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत् । अतिकृच्छ्रेषु घोरेषु तिर्यग्यो
निषु जायते इति ॥ ॥ आमंत्रितो वीर्य दत्तं न प्रतिगृह्णीयात् ॥ ॥ निमंत्रितो विप्रो यदन्न
श्राद्धादिरूपमामान्नं शिष्टं वा न प्रतिगृह्णीयात् । भोजनांतरं वा न कुर्यात् । यथाह देवलः ।

५

श्चैवनिमंत्रितोयस्यपरिकुर्यात्प्रतिग्रहं। भुक्त्वाहारेपिवाभुंक्ते सुकृतंतस्यनश्यति॥ अनेनाऽ
मंत्रितस्यान्यश्राद्धग्रहणे दोषमाह मार्कंडेयपुराणे याज्ञः भुंक्ते श्राद्धं तु योयस्यन
रोन्येननिमंत्रितः दैवेवाप्यथवापित्र्ये सतुनिष्कृष्यते खगैः॥ यमोपि। आमंत्रितश्च
योविप्रोभोक्तुमन्यत्रगच्छति। नरकाणां शतंगत्वा चांडालेष्वभिजायते इति॥ ॥अथो
पवेशनमाह॥ ॥स्नातांश्छुचीनांचांतान्प्राङ्मुखानुपवेश्य दैवेयुग्मानयुग्मान्यथा
शक्तिपित्र्ये॥ ॥उपवेशयेदितिवाक्यशेषः। कीदृशाननुपवेशयेत् स्नातान् कृतस्ना
नान्पुनः कीदृशान् शुचीन् सूतकादिरहितान् पुनः कीदृशान् आचांतान् यथाशास्त्र
माचांतान् यथाकथंचित। एवं भूतान् दैवे वैश्वदेवार्थं युग्मानिति बहुवचनाश्च
तुरादीनयुग्मान्त्रेषु कुशेषु प्राङ्मुखानुपवेश्य यथाशक्ति युग्मान् त्रिपंचादीन् पित्र्यर्थमु
पवेशयेत। द्विगुणभुग्नाग्रेषु कुशेषु। अयुग्मत्वं च नवस्यो वांछितमिति दर्शितं। तथा च गौतमः
नवावरान्भोजयेदयुजोयथोत्साहं चेति। ब्रह्मांडपुराणेपि। सामर्थ्ये पिनवस्योर्वाङ्भोज
यीत सत्तरद्विजान्। नोर्ध्वं कर्तव्यमित्याहुः केचिद्दोषस्य दर्शनादिति। सत्त्रत्रया नमस्कृत्य गौरा श्रा०

२०

स्नाननिषेधार्थं। अयथनास्मृतिप्राप्तमेवानुवर्तितं। अयथना विशिष्टविधिः तथा च वायुपुरा
णे स्नुलक्ष्मीरिणाः स्नाना मितगंधवर्त्तितत्थैव हि। श्राद्धेक्षेता निषेधो दृश्यास्थ्मिधफलं लभेदिति।
देवलोपि। ततोनिवृत्ते मध्याह्ने कृप्तलोमनखान्द्विजान्। अभिगम्य यथामार्गं प्रयच्छेद्दंत
धावनं। तैलमुद्वर्तनं स्नानं स्नानीयं च पृथग्विधं। पात्रैरौदुंबरैर्दद्याद्वैश्वदेवस्यपूर्वकमिति
। आचमने विशेषो विष्णुपुराणे। उपस्पर्शोक्तकर्तव्योमंडलस्योत्तरे दिशि॥ कर्तव्यश्चाद्विजे
र्गोपिविधिवद्रूपतैः सह॥ मंडलस्योत्तरे भागे कुर्यादाचमनं द्विजः सोमपानफलं प्राप्नो
तिकाश्यपोतमाह इति। तथा चापस्तंबो। कुर्युराचमनं विप्रा उदीच्यां मंडलाद्बहिः। अन्यदिक्षु
यदाकुर्यात्त्रिरेणाः पितरो नात्र इति॥ ॥अविशेषेप्राप्ते विशेषमाह॥ ॥एकैकस्योदङ्मु
खान्॥ एकैकस्य पित्राद्रितयस्य यथाशक्ति प्रतिपुरुषमुदङ्मुखान्युग्मानुपवेशयेत् पक्षां
तरमाह॥ ॥द्वौवादैवेत्रीन्पि[illegible]त्र्योपवेशनमाह॥ ॥स्नातांश्छुचीनांचांतान्प्राङ्मुखानुपवे
श्य दैवेयुग्मानयुग्मान्पित्र्ये॥ ॥द्वौवादैवेदैकस्योद्वौवा॥ विश्वेदेवार्थं तु पितृपक्षोपदिस्ने
नकर्मार्थे पत्रस्य पः। दीउं कृतइति रीडाद्देशः। यस्येतिच्चेति दकारलोपः। पितरो देवताश्चैवे

तिपित्र्यं न त्विमित्र्येकं भोजयेत् त्रीन् पितुरेकं पितामहस्यैकं प्रपितामहस्य चैकं। प्रागुक्तलक्षणाः॥ द्वौ दैवे
प्राक् त्रयः पित्र्य उदक् एकैकमेव वेति। मनुर्विशेषमाह। द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र
वा॥ भोजयेत् सुसमृद्धोऽपि न प्रसज्जेत विस्तरे। सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः॥ पंचैता
न्विस्तरो हंति तस्मान्नेहेत विस्तरं। व्यासोऽपि। यस्माद्ब्राह्मणबाहुल्याद्दोषो बहुतरो भवेत्।
श्राद्धनाशो मौननाशः श्राद्धं तत्र स्वविस्मृतिः उच्छिष्टोच्छिष्टसंस्पर्शो निंदा दातुर्द्विषु भो
क्षितोदे शकालधनाभावे पक्षांतरमाह॥ ॥एकैकमुभयत्र वा॥ ॥एकं दैवे एकं
पितृगणेऽपि समर्थः। तथा च ब्रह्मपुराणे। देशकालधनाभावादेकैकमुभयत्र वा॥ शेषान्वि
त्तानुसारेण भोजयेदन्यवेश्मनीति। स्मृतिः॥ अयुग्मानपसव्येन पितृपूर्वं निमंत्रयेत्।
पित्रादेः सप्त पंच त्रीनेकैकस्यैकमेव वा॥ दैवे षट् चतुरो द्वौ वा [illegible]के कमुभयत्र वेति॥ ॥
मातामहानां चैवं॥ ॥मातामहानामप्येवं सर्वे पक्षा भवेयुरित्यर्थः। तत्र केचिदिममुप
देशमपश्यमानाः पृथक्कर्म मातामहश्राद्धमिच्छंति। यद्वा मातामहेभ्यो दद्यादिति तद्देवमि
ति। तदेतदुपेक्षणीयं। अपरे तु। पार्वणं कुर्वन्नेय तु केवलं पितृहेतुतः। मातामहं न कुर्वीत पि

त्महाणोऽपि तापत इति स्कंदपुराणवचनात्। पितॄणामिव मातामहानामपि तत्सि
द्धिरन्नेव प्रयोगो ह्यानामिच्छंति। तच्चातीव युक्ततरं। तथा च॥ पितरो यत्र पूज्यंते तत्र माता
महा ध्रुवमिति॥ ॥तंत्रं वा वैश्वदेविकं॥ ॥विश्वेदेवांस्तु तंत्रेणावापक्षे च पितृभ्यो माता
महेभ्योऽपि त एव॥ इत्यापमसः पक्षः तथा च पदे विब्राह्मणाभावे। एक एव यदा विप्रो
द्वितीयो नोपपद्यते। पितॄणां ब्राह्मणो योज्यो दैवे त्वग्निं नियोजयेत्॥ प्रणीता पात्रमुद्ध
त ततः श्राद्धं समारभेदिति। तथा हि। यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्। अ
न्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च। देवतायतने चैव ततः श्राद्धं कल्पयेत्। प्रास्ये
दग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिण इति॥ ॥श्रद्धान्वितः श्राद्धं कुर्वीत॥ ॥नात्र श्रद्धानि
मित्तत्वेनोच्यते॥ यच्छ्राद्धं कुर्वीत स्वकाले तच्छ्रद्धयेत्यर्थः॥ ॥शाकेनापि नापरपक्षमति
क्रामेत्॥ यद्यन्नं लभेत तदा शाकेनाप्यपरपक्षे श्राद्धं कुर्यात्॥ तथा च ब्रह्मपुराणे॥ प
योमूलफलैः शाकैः कृष्णपक्षेषु सर्वदा॥ पराधीनः प्रवासी वा निर्धनो वापि मानवः॥
मनसा भावशुद्धेन श्राद्धं दद्यात्तिलोदकमिति अनेनावश्यं कर्तव्यता विहिता॥ तत्र हेतु

१

॥ अथधर्मानाह ॥१

माह॥ ॥मासिमासिवोशनमितिश्रुतेः॥ ॥तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवा
दीस्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेत्॥ ॥तदहस्तच्छिन्नहनि श्राद्धदिने एते निय
माः॥ शुचिनाद्योभ्यंतरबसनरक्तमाबाधपुष्टि एहितः॥ अथवा शुक्लवासः स्रग्वि॥ काषा
यादेः प्रतिषिद्धत्वात्॥ तथाच हारीतः॥ शुचयः शुचिवाससः स्युरिति॥ अप्रमत्तः तिल
सुकुशकालादिषु सावधानः॥ स्वाध्यायः श्राद्धमंत्रजपादिव्यतिरिक्तवेदपाठः॥ मैथुनं पूर्व
दिनेपि॥ स्यामसम्यक्तः॥ अन्येपि दातभौ नियमाः स्मृत्यन्तराद्याः॥ यमः॥ पुनर्भोज
नमध्वानं भारमध्ययनमैथुनं॥ संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्टवर्जयेदिति॥ मत्स्यपुरा
णे॥ पुनर्भोजनमध्वानं यानमायासमैथुनं॥ श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेतद्विवर्जयेत्॥
स्वाध्यायं कलहं चैव दिवास्वापं तथैव च॥ यानं स्त्रग्यानं॥ तद्विपरीतार्थं तस्येव निषे
धः॥ दंतधावनतांबूलं स्निग्धस्नानमभोजनं॥ रत्यौषधपरान्नं च श्राद्धकृत्सप्तवर्जयेदि
ति॥ दंतानां धावने प्रायश्चित्तमुक्तं विष्णुपुराणे श्राद्धोपवासदिवसे खादित्वा दंतधावनं गा
यत्र्या शतसंपूतमंबुप्राश्य विशुध्यतीति॥ अध्याह्निमनेदोषमाह यमः॥ अमंत्रितस्य

श्रौ० ६

दानं ६

एम०
१

यः श्राद्धे अध्वानं प्रतिपद्यते॥ भ्रमंति पितरस्तस्य तं मासं पांसुभोजिनः॥ याज्ञवल्क्यः॥ अ
ध्वनीनो भवेद्यश्च पुनर्भोजी तु वायसः॥ होमकृन्नेत्ररोगी स्यात्पाठादायुः प्रहीयते॥ दा
नं निःफलतामेति प्रतिग्राही हरिद्रता॥ कर्मकृज्जायते दासो मैथुनी शूकरो भवेदिति मै
थुनं चाष्टविधं दक्षः॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोध्यवसायश्च क्रिया
निष्पत्तिरेव चेति॥ शातातपः॥ श्राद्धं कृत्वा परश्राद्धे भुंजते ये तु मोहिताः॥ पतंति पितरस्तेषां
लुप्तपिंडोदकक्रियाः॥ अन्ये च नियमास्तत्र तत्र वक्ष्यंते॥ ते च श्राद्धे प्रधाने गौणत्वे चन्या
यबाधिताः क्वापि केपि न भवंति॥ यथा तीर्थश्राद्धे अध्वउपवासश्च न दोषाय प्याभिक्षा
नानिमित्ते श्राद्धे मैथुनं अग्निहोत्रनिमित्तश्राद्धे होमः॥ स्वद्वितीयविवाहश्राद्धे प्रतिग्रहः
एवं कंस्यादाना॥ भ्युदयिके दानं॥ तीर्थयात्रा एं भस्समाप्तौ एप्प ध्यानमेव॥ ते चापरतंत्रत्वात्॥
एवं चलपमूहनीयं॥ ॥आवाहनादिवाक्पतः श्राद्धोपस्पर्शनात्॥ आवाहनादिक्रमावह
नादारम्य आद्योपस्पर्शनाद्वा॥ कुराचमनपर्यन्तं यजमानो वाग्यतो भवेत्॥ वाग्यमनलो
पे वैष्णवमंत्रं जपेत् विष्णुस्मरणं वा प्रायश्चित्तं॥ तथाच मात्स्यकल्पः॥ यद्विवाग्यमनलो

८

पः स्याज्जपादिषु कथंचनाप्याह । दैवे स्मृतं मंत्रसारे ह्यानि सुमध्यमं । अत्रानाघ दिवामोहास्म
अवेताश्च रेखुमतास्मरणाद्देवता द्विस्मोः संपूर्णास्या दितिश्रुतिः । तथा कशातपश्चीश्रु
तिः । अथापह्वाचेपमोप्याहातितस्माद्देहेष विसर्ज्जे यतः पएरुन वर्त्तते तत्रवै स्मवी
मचं वा यजुर्वर्जिपेदिप्यादि ॥ ॥ आमंत्रिताश्चैवं ॥ ॥ आमंत्रितो ये ब्राह्मणास्तेपि
एवमेवानुष्ठानं कुर्युः ॥ ॥ इति त्रिरागनिषित्संभारएखपति श्रीमहायाज्ञिकवामनात्म
जदीक्षितगदाधरविनिर्मिते कातीयश्राद्धकल्पविवरणे प्रथमा कंडिका ॥ १ ॥ दैवपू
र्वकं श्राद्धं ॥ ॥ आ उपस्पर्शनादित्यनुवर्त्तते निमंत्रणादिश्राद्धसमाप्तपर्यंतं श्राद्धे यत्किं
चित्क्रियते तत्सर्वं दैवपूर्वकं कर्त्तव्यमित्यर्थः । तथा च देवलः ॥ यत्र यत्र क्रियते कर्म पै
तृकं ब्राह्मणान्प्रति । तत्सर्वं तत्र कर्त्तव्यं वैश्वदेवपूर्वकमिति ॥ ॥ पिंडपितृयज्ञव
दुपचारः पित्र्ये ॥ पितृकर्मणि पिंडपितृयज्ञवत्करणं भवतीत्यर्थः ॥ अनेनापसव्यं दक्षि
णामुखवामजान्वनुपातादिषु दर्शितं ॥ अतश्च नीविबंधनादि पिंडो स्थानपर्यंतं पिंडपितृ
यज्ञोक्तधर्मो भवतीति ॥ एतदपवादः ॥ अपसव्यैकं नेसवेश्राद्धं पश्याद्विधा ॥ सू. कस्ती

नं १ बं १

एफ०
८

र्णजनयमुक्त्वा विप्राणां च विसर्जनं ॥ अपि च ॥ स्नु कस्तोर्णजनयमुक्त्वा पिंडाद्यर्पणं च द
क्षिणं आचम्य नंस्वाग्नौ चैव विनाचपरिवेषणं ॥ विसर्जनं सौमनस्य माशिषां प्रार्थ
नं तथा । विप्रप्रदक्षिणं चैव स्वस्तिवाचनकं विना ॥ पित्र्यमन्यत्सकर्त्तव्यं प्राचीनावीतिना स
सदेति जमदग्निः ॥ ॥ द्विगुणास्तु दर्भाः पि[illegible]त्यं दर्भाननुवर्त्तते ॥ तु पुनः पित्र्येह विरूलगादि
द्विगुणीकृता दर्भा भवंति ॥ अर्थाद्दैवे ऋजव इति ॥ अत्राह बौधायनः ॥ प्रदक्षिणं तु देवानां
पितृणामप्रदक्षिणं ॥ दैवानां मृजवो दर्भाः पितृणां द्विगुणाः स्मृताः ॥ कात्यायन स्मृतौ
विशेषः ॥ सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया ॥ सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिव
द्भवेदिति ॥ दर्भलक्षणं चोक्तं यज्ञपार्श्वे । कीदृशा यज्ञियादर्भाः कीदृशाः पाकयज्ञियाः
दर्भाः कीदृशाः पाकयज्ञियाः ॥ कीदृशाः पितृदैवत्याः कीदृशा वैश्वदेविकाः ॥ हरिता य
ज्ञिया दर्भाः पीतकाः ॥ पाकयज्ञियाः ॥ समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः ॥
अग्रस्तजाः स्मृता दर्भाः [illegible] प्रसूतास्तु कुशाः स्मृताः ॥ आमूलास्तु तथा ज्ञेया इत्येषां नि
गमीश्रुतिः ॥ माहेश्वरादिकादर्भास्त्रिपत्राद्युतान्वये ॥ कुशास्तेषां तु के मीका हाना

९

दिषु पवित्रकाः ॥ दर्भाः किमर्थं दीयंते श्राद्धकालेषु किं तिलाः ॥ किमर्थं वेदविप्राद्धे किमर्थं हविष्मती ॥ रक्षंति एतस्मान् दर्भास्तिला रक्षंति चासुरान् ॥ वेदविद्ब्रह्मपंक्त्या दंपती नांतरं मम पपमिति ॥ दर्भाभावे काशादि गृहीत्वा कर्म कुर्यात् ॥ तथा च स्मृतौ ॥ कुशाभावे तु काशाः स्युः काशाः कुशास्समाः स्मृताः ॥ काशाभावे गृहीतव्या अन्ये दर्भा यथोचिताः ॥ दर्भाभावे स्वर्णरूप्यताम्रैः कर्म क्रियाः सदा ॥ कुशाः काशाः शरा दूर्वा यवगोधूमबल्वजाः ॥ सुवर्णं रजतं ताम्रं दश दर्भाः प्रकीर्तिताः ॥ स्नाने होमे तथा दाने स्वाध्याये तर्पणे पि च इति ॥ ॥ पवित्रपाणिर्दर्भासीनः सर्वत्र ॥ ॥ सर्वत्र ग्रहणं देवे पित्र्ये च पक्षे किं चिद्दर्भासीनस्सर्वमासीनः पवित्रपाणिः सन् दद्यात् ॥ पवित्रपाणिः कुशपाणिः पवित्रशब्दो ऽत्र कुशवचनः ॥ पवित्रे स्थ इति मंत्रलिंगात् ॥ ॥ अप्यवाहस्ति मासं पवित्रपाणिमासीनत्वं निषेधती सर्वः ॥ तथा च पठंति ॥ वामहस्ते धृतान् भक्त्या हेरण्या बलींस्तथा ॥ ललाटे तिलकं दृष्ट्वा निराशाः पितरो यातां इति ॥ किंचावाहनेनासीनस्तु पितृषु कर्तुः राणीनत्वेन युक्तं ॥ तथा च पुराणे कलितां ॥ अप्यंजलिपूर्या च पक्षितां बावाहयेत् सितॄनिति ॥ ॥ एम०

अथवा
-चात्रसार्थकस्तेनानुवदति ॥ तेन वामहस्ते कुशादानं पितॄणामावाहने चासीनत्वं १०

९

·पीठेषु ५

प्रश्नेषु पंक्तिमूर्द्धन्यं पृच्छति सर्वान्वा ॥ ॥ वाशब्दो विकल्पार्थः ॥ देवंसप्रश्नेषु आवाहनादिप्रश्नेषु पंक्तिमूर्द्धन्यं पंक्तेराग्रं ब्राह्मणं पृच्छेत् ॥ सर्वान्वा पृच्छेत् ॥ तुल्यविकल्पस्याष्टदोषदुष्टत्वात् व्यवस्थित ॥ विकल्पोपमिति ॥ श्राद्धकाशीकाकार ॥ तुल्यविकल्प एवायमिति कर्काचार्यादयः ॥ ॥ आसनेषु दर्भानास्तीर्य विश्वान्देवानावाहयिष्ये इति पृच्छति आसनेषु दर्भानास्तीर्य आच्छादनं कृत्वा विश्वान्देवानावाहयिष्ये इति पृच्छेत् ॥ पंक्तिमूर्द्धन्यं सर्वान्वा ॥ आसनान्याह स्मृतिः ॥ शमीकाश्मर्यशल्लश्रीकं दंबोवारणस्तथा ॥ पंचासनानि शस्तानि श्राद्धे वा दैवतार्चने ॥ तथा ॥ श्रीपर्णीविरूणद्धी रीजंबकाम्रकदंबजं ॥ सप्तवा मंकुलं पीठं पितॄणां दत्तमक्षयमिति ॥ आसनेषु दर्भानास्तीर्येति वदता हस्ते विष्टरदानं निराकृतं ॥ कर्काचार्या स्त्वेवमाहुः ॥ एतदास्तरणमासनात्सर्वमुपवेशनात् दृष्टव्यं ॥ पाठक्रमादर्थक्रमस्य बलिष्ठत्वात् ॥ ॥ आवाहयेत्यनुज्ञातो विश्वेदेवास आगत इत्यनया ऽऽवाहाक्वकीय विश्वेदेवाः शृणुते ममिमं जप पित्वा पितॄनावाहयिष्य इति पृच्छति ॥ ॥ ततो ब्राह्मणैरावाहयेत्यनुज्ञातो विश्वेदे

१०

नासन्नाः॥ तेन नमस्कृत्वावाहयेद्वैश्वदेवब्राह्मणं पुरतो यवान्प्रादक्षिण्येनावकीर्य विश्वेदेवास अ
गतेति मितीमंत्रं पठित्वा पितॄनावाहयिष्य इति पृच्छति॥ अत्रेति लेखकीर्णमिति कर्कोपा
ध्यायः॥ अस्मितु॥ यवैश्चावकीर्येति याज्ञवल्क्यवचनाद्यवैः कुर्वंति॥ द्विजानेकत्वेपि
न प्रतिद्विजमावाहनावृत्तिः। सकृदावाहनेनैवानेकब्राह्मणाधिष्ठाने देवताध्यासन
संभवात्॥ ॥आवाहयेत्यनुज्ञातउशंतस्त्वेत्यनयावाहयावकीर्य यंतुन इति जपित्वाप
ितृपक्षे सव्यमस्तेषु पवित्रांतर्हितेषु एकैकस्मिन्नप आसिंचति शन्नो देवीरिति॥ ॥आवा

पृ८ हयेति ब्राह्मणेनानुज्ञातउशंतस्त्वेति मंत्रेण पितॄनावाह्य पितृब्राह्मणानग्रतस्तिलान्
प्रादक्षिण्येनावकीर्यायंतु नः पितर इति पठेत्॥ यत्त्वंगं हेति तिपवित्रियाः पालाशादयः
॥पत्रविनिभागंघसंभावितिघमत्पयः॥ तेवैपालाशाः स्मृतिषुपक्रम्यएते हिरक्षाय हि
पाइतिहविर्यज्ञकांडेश्रुतिः। एषामन्यतमेषु च मसेषु अनंतर्भिताप्रमाद्देशमात्रकु
शाद्यप्रसाहितेषु शन्नो देवीरभिष्टय इत्यनेन एकैकस्मिन्नपो निषिंचेत्॥ एकैकस्मिन्त्रि
निप्रतिपात्रं मंत्रावृत्तिरिति दर्शयति॥ चमसानां लक्षणं बौधायनः पार्श्वे॥ चमसानां तु वृक्षा

एम॰
१०

भिरद्वाः स्युश्चतुरंगुलाः। अंगुलं तु भवेत्खाविस्ताः स्युश्चतुरंगुलाः वैकंकतमयाः श्लक्ष्णत्व
ग्बिलाश्चमसास्मृताः॥ अस्मो भोपि किंकर्पापाः स्युरिति। तत्रैवोक्तं प्रादेशायामाः॥ पवित्र
लक्षणं च छंदोगपरिशिष्टे। अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च॥ प्रादेशमात्रं विज्ञेयं पवि
त्रं यत्र कुत्रचित् इति॥ अत्र देवपात्रे द्वे पवित्रे पितृपात्रे त्रीणि भवंति॥ तदुक्तं चतुर्विंशतिम
ते। द्वे द्वे शलाके देवानां तिस्रस्तिस्रः स्कपावणे॥ एकोद्दिष्टे शलाकैकाश्राद्धेषु सर्वेषु पुनि
क्षिपेदिति। अत्र याज्ञवल्क्यवचने नावाहनार्घपूरणदानानां मघपिंडानुसमयपर्तीयतेत
था पिपदार्थानुसमयो प्रवीदृश्यः॥ तुल्यसमवाये सामान्यपूर्वमानुपूर्व्यंयोगादिति पारि
भाषितत्वात्॥ अस्यार्थः॥ तुल्यानां प्रधानानां समवाये एकप्रयोगानुष्ठाने यत्साधारणमं
गजातं तत्सर्वेषां पूर्वं भवति। तथा समानुपूर्व्येण पदार्थाः कृता भवंति। यथा श्राद्धेपि
त्रादिषड्गणएकत्रप्रयोगेकृपंने तत्र निमंत्रणादयः सर्वेषां क्रमेण पदार्थाअनुष्ठिता भ
वंति। अन्यथा एकैकस्य पित्रादेः सर्वपात्रास्य परिसमाप्तौ द्वितीयोपक्रमे भंगाः स्यात्॥ प्र
थमस्य विसर्जने। द्वितीयस्यामंत्रणमापद्येत। तथा समानुपूर्वे भंगाः प्रसज्येत। तत्रुनि

प्र८

क्रम२

षिद्धं। तस्मादेकैकं पदार्थं [illegible] नातं सर्वेषामपि निर्वापश्च द्वितीयादिनिर्वापः कार्यः॥ एव
मपि बहुभिः पदार्थैरनुविधानं भवति तत्र न दोषाय न हि सजातीयैरनुविधानमिष्यते॥ तस्मा
त्सर्वेषां निमंत्रणार्घ्यधूपादिः। एवं चावाहनमपि आवाहनावकिरणजपसमुदायरूपं॥
जपे तु नरति मंत्रलिंगात्॥ अत एव गृह्येकोद्दिष्टतीर्थश्राद्धनित्यश्राद्धे आवाहननिरन्तोत्रम
मपि निवर्त्तते। कात्यायनस्य पदार्थानुसमय एवाभिमतः॥ देवा[illegible]वाहनानंतरं पित्रा[illegible]
वाह[illegible]नोक्तेः। एकैकस्मिंश्च पश्चात्सिंचतीति सर्वपात्रेषु जलं प्रक्षेप्यावाहनात्तदनंतरमेकै
कस्मिंश्च पश्चात्सिंचतीति सर्वपात्रेषु जलं प्रक्षेप्यावाहनात्तदनंतरमेकैकस्मिन्नेव तिलाना
वपतीति विधानात्। अत एकैकस्यार्घ्यपात्रे जलादिपुष्पांतं प्रक्षेप्यार्घ्यदानं तं वा
[illegible] निर्वर्त्य पात्रांतर एवमेवेति मतं न युक्तं॥ किंच पदार्थानां क्रमानुरोधादपि पदार्था
नुसमय एवार्हति। अतो निमंत्रणादावपि पदार्थानुसमय एव॥ ॥ एकैकस्मिन्नेव ति
लानावपति तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितृंल्लो
कान्प्रीणाहि नः स्वाहेति॥ ॥ तिलोसीमनेन एकैकस्मिन्पात्रे तिलानावपति। प्रक्षिपति॥

११ श्रा०

सांवृत्ति श्राद्धे पु० एम० ११

उदुंबरं ताम्रमुच्यते ।४

आदौ देवपात्रे प्रक्षिप्य ततः पितृपात्रेषु प्रक्षेपः॥ ननु एकैकस्मिन्नित्यनुवर्त्तमाने पुनरेकैकस्मि
न्निति ग्रहणं किमर्थमुच्यते। तिलोसीति मंत्रे पितृन्प्रीणाहीति बहुवचनांते न पितृश्राद्धे
नैकत्वादन्यूहितस्य कृत्स्नमंत्रः प्राप्नोतीति तन्मा भूदित्येकैकस्मिन्निति पुनर्ग्रहणं॥ ॥ सौ
वर्णराजतौदुंबरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यंते॥ औदुंबरस्तु
स्यात् उपक्षिप यज्ञचमसे भिन्नने नैवोक्तत्वात्॥ मणिमयानि शंखशुक्तिस्फटिकादिपा
त्राणि। एषां मध्ये एकस्य पात्राणि कल्प्यते॥ यानि वा विद्यंत इति निषिद्धेतराणि अन्यपा
त्राण्युच्यंते। तथा च छंदोगपरिशिष्टे। आसुरेण तु पात्रेण यत्तु दद्यात्तिलोदकं॥ पि
तरस्तस्य नाश्नंति दशवर्षाणि पंच च॥ कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृतं। तदे
व हस्तघटितं स्थाल्यादि दैविकं भवेत्। इति। एतेन तु पित्र्य एवान्नत्युक्तं वायुपुराणे॥ तथा
पि पिंडभोज्येषु पितृणां राजतं मतं। अमंगल्यं तु यत्नेन देवकार्येषु वर्जयेदिति॥ पत्रेषु
दपुटेषु वा॥ वौशाद्ध्ये विकल्पार्थः॥ पूर्वं श्रौतविहितप्रतिबिंदुनिषेधार्थ इति। श्राद्धकाशि
काकारः॥ प्रवीणानामलाभे पालाशपत्रे पालाशादिपक्षिपद्मपत्रपुटेषु नार्घ्यं प्रकल्पयेत॥

वा शेषुच्य पूर १

१२

तथोक्तं ब्रह्मपुराणे॥ अथ पत्रपुटे दत्वा मुनीनां वल्लभी भुवेदिति॥ तानि च पात्राणि पित
र्योमातामहेभ्यश्च त्रीणि त्रीणि क्रियंते॥ यत आह॥ एकैकस्यैकैकेन दद्यात्सपवित्रेषु
हस्तेषु या दिव्या आपः पयसा संबभूवुर्या आंतरिक्षा उत या पृथिवीर्याः हिरण्यवर्णा यज्ञि
यास्तान आपः शिवाः शं स्योनाः सुहवा भवंतु इति सावेषतेऽर्घ इति॥ ॥अत्र स्वधा
मुलकपूर्व सवर्णाच्छेपाद्दा आपा जलं इति। चतुर्थ्यर्थे षष्ठी विभक्तिः॥ एकैकस्य पित्रा
देः संबंधि ब्राह्मण हस्तेषु सपवित्रेषु या दिव्या इति मंत्रेण अमुकशर्मन् एष तेऽर्घ इति
दद्यात्॥ आसादीस्तत्र पथा देवतं नाम गृहणं कार्यं। अस्तावित्यपनोद इति परिभाषया
मुक्तत्वात्॥ तस्यायमर्थः॥ यत्र मंत्रमध्ये असाविति एवं सर्वनाम पठितं भवति। तत्रैतत्सर्वना
मपदमपनोदेऽपनयेव र्तते। तस्यापनोदमपनयं निष्कासनं कृत्वा तस्य स्थाने षष्ठिव
क्तितं तस्य नाम्नः प्रक्षेपः कार्यः॥ सपवित्रेष्विसनेनतं त्रेणा सर्व ब्राह्मण हस्तेषु सूचितं न प्रति
हस्तं मंत्रावृत्तिः एकैकस्येत्यनेन प्रति पुरुषं हस्तार्घदान मिति सूचितं॥ अत्राह कात्यायनः॥
अर्घ्ये क्षय्योदके चैव पिंडदानावनेजने॥ तंत्रस्य तु निवृत्तिः स्यात्स्वधावाचन एव वा ति। अत्रायं

एवं०
१२

प्रकारः पितुर्यावंतो ब्राह्मणास्तेषां सपवित्रेषु ज्येष्ठोत्तरेषु हस्तेषु पितुरेकस्यैकोऽर्घो दातव्यः
॥ एवं पितामहप्रपितामहयोः॥ मातामहानामप्येवं तेषां पवित्राणि यान्मंतद्वीयो दक
मासिक्तान्येव भवंति प्रकृतत्वात् अत्रैके पवित्रा तरमुत्पादयंति। एषामेकत्र विनियु
क्तानां विनियोगांतराभावात्॥ तदयुक्ततरं॥ यथा मंत्राणां क्रियायां पुनः पुनर्विनियो
गः॥ एवं कुशानामपि। तथा हि। दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणाश्च विशेषतः। नैते निर्माल्य
तां यांति योज्यमानाः पुनः पुनरिति। तस्मात्तान्येव भवंति॥ अत्र केचिदेकद्रव्ये कर्मसृत्तौ
सकृन्मंत्रवचनं कृतत्वादिति न्यायेन सकृन्मंत्रवचनमिच्छंति। कर्कमते तु प्रतिप्रक्षेपं
मंत्रोच्चारणवत्॥ तथास्माकमपि। अत्र केचिदेवं प्रपितान्तदनंतरं चार्घं दत्वा ततः पि
त्र्यस्य पात्रजातस्य पूरणादि कुर्वंति। तदसत्। न हि कांडानुसमयस्यात्र प्रमाणमस्ति
पदार्थानुसमयोऽयं। तस्मात्प्रमाणं पूरणं। ततो दानं। स्वस्थं तदसं भवेपि भवाद्दोष
इति नतो विकल्पोऽयमिति॥ अत्रैके पूरणे पात्रेयुगमं वितिमतस्य पुराणोक्ते रेकैकस्य
तु विप्रस्य अर्घपात्रे निक्षिपेदिति प्राचीनसंपोक्तेश्च वैश्वदेविके ब्राह्मणसंख्यया पात्रा

१३

णिकुर्वंति। कर्कमते त्वेकमेव पात्रं दैवे। केचिद्द्विजहस्तप्रक्षालनं पवित्रं पुनरर्घपात्रे निःक्षिपंति। तद्द्वतीय
मंत्रे। इत्यत्रोपस्थाने प्रमाणभावात्॥ या दिव्या इत्यस्यार्थः॥ आपः पानीयानि पयसा सं
बभूवुः। संगमना बभूवुः॥ माधुर्यशीतलत्वादिना एकीभूताः॥ कास्ता आपः या दिव्याः दि
विस्वर्गे भूताः॥ कास्ता आपः या दिव्याः दिविस्वर्गे भूता॥ उत अपि या अंतरिक्षाः॥ आका
शे भूताः। उत अपि या पार्थिवीः पृथिव्यां भूताः॥ उत शब्द उभाभ्यां संबध्यते। किं भूता हि
रण्यवर्णाः हिरण्यं रजतं तत्समानवर्णाः॥ शुक्लवर्णा इत्यर्थः॥ पुनः किंभूताः। यज्ञियाः
यज्ञार्हाः। ताआपः नो अस्माकं शिवाः क्षेमा भवंतु॥ स्योनाः सुखदा भवंतु। सुखं याज्ञ
धुवा हस्तेकृता भवंतु। वित्यनेनैव संबंधः॥ स्योना इति सुखस्य नाम इति यास्कः॥ ए

पि०

केकमुभयत्र देवेषु पित्र्येषु च दैवे पित्र्ये पात्रत्रयं कार्यं॥ ॥ प्रथमे पात्रे तूं संस्रवान् समवनीय
पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधाति॥ ॥ संस्रवशब्देनार्घपात्रलग्ना पोचपवाला
भिधीयंते। स च संस्रवी द्वे चखलु परिशिष्टो भवती। तिष्ठतिवाकात्। प्रथमे पात्रे पितुः प्र
यमे अर्घपात्रे संस्रवान् समवनीय निक्षिप्य पितृभ्यः स्थानमसीत्यजेन मंत्रेणातत्प्रथ

ए०
१३

७ नक्वेनलं क्षेमाः अपि संकल्पकारिण्यो भवंतु

मं पात्रं मुब्जमधोमुखं निदध्यात्। अत्राह यमः। पितृकं प्रथमं पात्रं तस्मिन्पितामहं न्य
सेत्। प्रपितामहं ततो मध्ये नोद्धरेत्न विचालयेत्। पितामहं संख्ये वमिर्त्यर्थः। पुरा
णे विशेषः॥ आसिच्य प्रथमे पात्रे सर्वपात्रस्थसंस्रवान्। ताभिरद्भिर्मुखं सिंचेद्य इच्छे
न्नमभिप्सति। चतुर्विंशतिमते संस्रवान् प्रथमे पात्रे निर्णीया द्भिर्मुखं स्पृशेत्॥ अद्भि
र्मुखस्पर्शनस्य पुत्रकामार्थत्वाद्विकृताव प्रवृत्तिः। तत्र न्युब्जीकरणं पितृब्राह्मणस्य वामपा
र्श्वे। तथा च मत्स्यपुराणे। पात्रं न्युब्जं मुत्सृज्य दद्यात् दंधादिकं ततः। वस्त्रोत्तरं चानुपूर्व्या द
त्वा संस्रवमादितः पितृपात्रे प्रदद्यात् पाथस्युब्जमुत्तरं विन्यसेत् इति। उत्तरं शाखोषामवचनः
सव्यावारा। द्रोणतुरेव। ब्राह्मणहस्तात् लिताघ्रर्धादिका निपितृपात्रे प्रसिंचेद्दक्षिणाग्रेषु
केशेषु पितृभ्यः स्थानमसीति पवित्रेषु न्युब्जं कृत्वा तस्योपर्यर्घपात्रपवित्राणि क्षिप्त्वा पु
ष्पादि क्षिपेत्। तत्पात्रं मासमात्रेण च चालयेन्मातामहेषु चैवमिति स्मृत्यर्थसारे॥ अत्रांग
पुष्पधूपदीपवाससां च प्रदानं॥ ॥ अत्रास्मिन्नवसरे विप्रेभ्यो गंधादिकं दद्यात्॥ गंधा
दीनां स्मृत्यंतरेण विशेषो दृश्यः॥ चंदनं कुंकुमं कर्पूरं रूपं अकोस्तु लेपनार्थे इति

श्रा

प्राण्यंगं धूपेनदद्यात् २

१४

विस्मो क्तं। पुष्पे॥ पद्मोत्पलमल्लिकायूथिकाशतपत्रंचंपकानि॥ धूपः सं पन्नात्पिंडियेता
नि धूपो घृतमधुसंयुक्तं गुग्गुलुश्रीवेष्टा॥ तह रसाद्दद्यात्दीपे शंखः॥ घृतेनदीपोदा
तव्यस्तिलतैलेनवापुनः॥ वसामेदोद्भवंदीपंप्रयत्नेनविवर्जयेत्॥ वस्त्राणि कुंकुमहतं
सदृशीवस्त्रंदद्यात्। चकारानुक्तसमुच्चयार्थः॥ तेनसतिसंपत्तौ सूत्राति दिक्कं यो प्रद
पदातव्यं। तथाचविष्णुपुराणे। लोकेश्रेष्ठतमंसर्वमात्मनश्चापियत्प्रियं सर्वंपितॄ
णांदातव्यंतदेवाक्षयमिच्छतीति। यज्ञोपवीतंयोदद्यात्श्राद्धकालेतुधर्मवित्। पावनं
सर्वविप्राणांब्रह्मदानस्यतत्फलं। दानंचापितत्संप्रदानकं। प्रतियन्निस्कब्राह्मणेभ्यः
नघ। पाद्यंधपुष्पधूपदीपाच्छादनानां मिलितानांप्रदानंप्रतीयते। तथापिस्वस्वंतराद
र्शनात्गंधादीनामेकैकंदेवाद्विमातामहाधंतमुत्सृजेद्दद्यात्। तथाचप्रयोगपारिजि
षातांधोदकंचदातव्यंतत्त्रिकर्षक्रमेणतु। गंधान्ब्राह्मणसात्कृत्वापुष्पाण्यृतुभवानिच।
धूपंचैवानुपूर्व्येणअग्नौकुर्यादतःपरमिति। दक्षालाभेमूल्यंवाम्लाभेउत्तरीयंयज्ञोप
वीतंवादद्यादितिस्मृतिसार्थसारे। अस्मिन्नवसरेब्राह्मणेभ्योऽन्नभाजनानिनिधापयंद

एप०
१४

नि
त्वाकुर्यात्॥ अत्राश्वलायनः। चतुष्कोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्यतु। मंडलाकृतिर्वैश्यस्य
शूद्रस्याभ्युक्षणंस्मृतमिति। ब्रह्मपुराणेमंडलानिचकार्याणि नैवारैश्चर्गौर्भैः।
गोमयेन। त्रिकयावापिप्रणीतेनचभस्मना॥ अणीतस्त्वाबव्तस्थ्यामिस्तदीयेनभस्मना॥ त

तु

त्रमंत्रः। यथाचक्रायुधोविष्णुस्त्रैलोक्यंपरिरक्षति। एवंमंडलभस्मैतत्सर्वभूतानिरक्षतिति
॥ ॥ इतिश्राद्धाधारभाष्ये द्वितीयाकंडिका॥ २॥ उद्धृत्यघृताक्तमन्नं पृच्छत्यग्नौकरिष्यइति
॥ वैश्वदेवादत्वात्‌दृढ्यघृताक्तमन्नंघृतप्लुतमन्नंपात्रांतरेकृत्वाततःपृच्छत्यग्नौकरिष्य
इत्यनेनमंत्रेण। प्रश्नस्यरूपनिर्देशार्थइतिकारः अतश्चपर्यायांतरेणप्रश्नाभावः। घ
ताक्तमितिनिष्ठाभूतेर्थे। ततश्चाधिकृतसेवाभिधारणंस्मृतिः। तदुक्तंप्रपपतितस्मिन्न
धिश्रितस्याज्यंप्रत्यानयमग्नौवैदेवेभ्योजुहुत्सुदरैतिमनुष्येभ्योऽवैवंपितृणामिति

दे

पिंडपितृयज्ञेहेतूपन्यासात्। पित्र्यत्वस्यान्वापितृल्यत्वात्॥ घृताक्तग्रहणंरूपशास्त्रा
दिति वृत्सर्वं॥ तथाचविष्णुपुराणे। जुहुयाद्व्यंजनक्षारवर्ज्जमितिं॥ कुरुष्वेत्यनुज्ञातःपिं
डपितृयज्ञवद्धुत्वाहुतशेषंदत्वापात्रमालभ्यजपतिपृथिवीतेपात्रंद्यौरपिधानंब्राह्म

१५

णस्यमुखेन ममतेन मम तं जुहोमि स्वाहेति॥ ॥ततः पंक्तिमूर्द्धन्येन सर्वैर्वा कुरुष्वेत्यनुज्ञातः पिंडपितृयज्ञवत्वाहुतशेषं ब्राह्मणभाजनेषु दत्वा पात्रमालभ्य सर्वान् नात् स्पृष्ट्वा पृथिवी तद्दत्तीमं मंत्रं जपेत्। पात्रमालभ्य जपः न तु मंत्रांते आलभेत्। पात्री दृश्यमानत्वात्मतिपात्रमालंभनं। पिंडपितृयज्ञवदुपचारः इत्यनेनैन पिंडपितृयज्ञातिदेशश्चोक्तः। पुनः पिंडपितृयज्ञग्रहणं परिस्तरणादिपदार्थनिवृत्त्यर्थं द्रष्टव्यं। होममात्रस्यात्र [illegible] तिदेशः॥ सव्यापसव्यीकरणहोमः साग्निनावसथ्येग्नौ कर्तव्यः॥ तथा च याज्ञवल्क्यः॥ कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दायकालाहृते वापि श्रौतं वैतानिकाग्निषु इति। स्मार्तमंत्रश्राद्धं तदंगभूतेग्नौकरणहोम आवसथ्ये भवति। न च प्रकृतिविकृतिभावेनास्य श्रौतत्वं॥ कार्यातिदेशात् स्वरूपातिदेशेन तु अवहननफलीकरणपूर्वकचर्वादिमदृत्ति एपिस्यात्। कार्यातिदेशेन तु पुनः इतिकर्तव्यता मात्रमेव प्राप्नुयात्। अतः स्मार्तत्वादावसथ्याग्नावेव होमः। आहिताग्निस्तु कृत्वा दक्षिणाग्नौ समाहित इति मार्कंडेयवचनोक्तं तत्सर्वाधानपक्षे ज्ञातव्यं। आहृत्य दक्षिणाग्निं तु होमार्थं लौकिकं वा। पितृयज्ञाख्यकर्म सिद्धमेव इति वायुपु

एम०
१५

पा०८

वैशपलेन॥ आग्न्यर्थं

पा०८

णणीपसपि त्र्यौपसत्याह णपक्षे वेदितव्यं। अग्न्यभावे मनुराह॥ अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्॥ यो ह्यग्निः स द्विजो विप्रैर्मंत्रदर्शिभिरुच्यते इति। कात्यायनः॥ पित्र्ये यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निकः। कृत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेदिति। द्विजाभावे मत्स्यपुराणे। अग्न्यभावे तु विप्रस्य पाणौ वाथ द्विजोत्तमाः॥ अजकर्णेश्वकर्णे वा गोष्ठे वाप्यशिवांतिके इति। पाणिहोमपक्षे अनुज्ञावचनेन स्तः प्रकृतित्वात्। हुतशेषदाने विप्रतिपत्तिः। हुतशेषं दद्यादेवेति विशेषानुल्लेखतः साधारणपक्षे देवपित्र्ये दद्यमिति। कर्कावार्य्यमतं। कल्पतरुमिति हेमाद्रिमिताक्षरा कारणं मते पित्र्ये एव। एतदुभयं संमूलं शास्त्रपानिः। हुतशेषं सर्वं वै दैवे दत्वा तस्माच्च पित्र्ये दद्यादिति। पमः॥ अग्नौकरणशेषं तु पित्र्ये तु प्रतिपादयेत्। प्रतिपाद्य पितृणां तु न दद्याद्वैश्वदेविके इति॥ धर्मप्रदीपके॥ अग्न्यभावे तु विप्रस्य हस्ते कृत्वा तु दक्षिणे। शेषं येत्थित विप्रार्थं पिंडार्थं शेषयेत्ततः इति। पात्रमालभ्य जपतीत्यत्र पात्रस्पर्शमत्रालंभ इति केचित्। तदन्ये वमं दयया॥ गार्ह्यपत्यमुत्तरेणोद्पात्रं निधायालंभत इत्यत्र कर्काचार्यैः पात्रालंभ उक्त एतया मंत्रा। पिपात्रालं

१६

भएवा। ब्रह्मपुराणे विशेषः। दक्षिणां त्यक्त्वा करं कृत्वा वामोपरि निधाय पठेत्। दैवं पात्रं मयालभ्य पृ
थिवी ते पात्रमुक्त्वा रन्॥ दक्षिणोपरि वामं च पित्र्यपात्रसालंभनमिति। पृथिवी ते पात्रमिति
स्पार्शः। हे अग्नीकरणीये घृते तव पात्रं आधारः पृथिवी विष्णुधारः [illegible] भूता पिधानं द्यौरा
काशं। वा अमृतं हुतशेषं ब्राह्मणस्य मुखेन जुहोमि॥ किंलक्षणे। अमृते [illegible] अमृतमन्न
ण द्विभिरङ्गुष्ठिति [illegible] इत्यर्थः। ब्राह्मणस्य मुखे अग्निरूपदर्शनात् अमृतं जुहोमीति वाक्या
र्थः। ब्राह्मणस्याग्निरूपत्वमाहापस्तंबः। पितरो देवता ब्राह्मणस्त्वाहवनीयार्थे इ
इति॥ ॥ वैष्णव्यर्चा यजुषा वाङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्य॥ ॥ वाशब्दो वि
कल्पार्थः॥ नियताक्षर पादावसानान्त्यकृत्। अनियताक्षरपादावसानं यजुरुच्यते॥ अत्र क
ग्निर्दं विष्णुः। विष्णो हव्यं रक्षस्वेति यजुः। इदं विष्णुरित्यृचं द्विजांगुष्ठं निवेशयेदिति वचनात्
तयोरन्यतरेण ब्राह्मणभोजने। स्थिते अन्ने द्विजांगुष्ठमधोमुखं निवेश्य अपहता इति मंत्रे
ण ब्राह्मणानामग्रतो भूमावेव तिलान्प्रकिरेत्। रक्षोघ्नत्वादुदङ्मुखानामिति कर्कः। अ
विशेषाद्दैवे पित्र्ये नेत्यर्थे इति केचित्। अन्न स्वतः एवं होमत्वान्मौनमपि स्वेणमाह॥ ॥उपस्थं

त सर्वेषामि ये २ देवानां २ देवा

स्व १ नं १ एम० १६

सिषमन्नं दद्यात्॥ ॥यावदुष्णं भवेदन्नं तावद्देयं। विष्टं ब्राह्मणपक्षे ताप कर्तव्यापि
ते अन्नं भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं पंचविधाय घृतयुक्तं कृत्वा सोनीकमन्नं दद्यादि
ति तथा पिमस्त्वं तरद्रु विष्णं व्रीहिशालीयवगोधूममुद्गमाषमुद्गकालशाकमद्गुम
रीचिहिंगुरसाकण्टकशर्करैं धवसंभार पनसनारिकेल कदलीबदराम्रपयोदधिघृतपा
यसमधुमांसप्रभृतीनि दद्यात्॥ सप्संहेतेत्रयातं माहुः सलुपं धान्यमुच्यते। आमान्नं वित्त
षं तेपं पक्वमन्नमुदाहृतमिति परिभाषणात्केचित् अन्नं पक्वमेवन्नमिताहुः। परिवेषणं न
भाभ्यामपि हस्ताभ्यामादायकुर्यात्। तदुक्तं मनुना। उभाभ्यामुपसंगृह्य स्वयमन्नस्य
वर्द्धितमिति। विशेषमाह कात्यायनिः। अपसव्येन कर्तव्यं पित्र्यं कृत्स्नमपोषतः। अ
न्वष्टकादृते सर्वमेवं मातामहेष्वपीति। अपसव्येन यस्त्वन्नं ब्राह्मणेभ्यः प्रयच्छति। विश
मश्नन्ति पितरस्तेन च सर्वे द्विजोत्तमाः इति। तद्दैते ज्ञानं परिवेषणमेव॥ ॥ [illegible] ॥ ॥स्मिश
नाभावे मरन्नस्वरूपमात्रं दातुं शक्नोति तेन हूपमितमर्थः। असिन्समये अन्नसंकल्पः कार्यः।
तस्यैवं प्रयोगः। इदमन्नं पहृतं पयदातास्मानिन् सिपर्यतं तत्सर्वं विश्वेभ्यो देवेभ्यः स्वाहा। न ततो

मा २

९

मुकस्यगोत्रेभ्योस्मत्पितृपितामहप्रपितामहेभ्योमुकामुकशर्मभ्योवसुरुद्रादित्यस्वरूपेभ्यः
इदमन्नंयथा इदंपत्रदत्तमामानंतत्परिपर्यंतंतत्सर्वंतेभ्यःस्वधेतिमातामहानामप्येवंसंक
ल्पंकुर्यात।पश्चाद्ब्राह्मणानांहस्तेषुदकदानंश्राद्धान्तेनास्तितथ्या।पिंडदानात्पूर्वा
कर्तव्यं॥ द्विजैश्चपर्युक्षणादिप्राणाहुत्यंताःसर्वेपिभोजननियमाविधेयाः।केवलंमसो
बालिहरणमेवनकार्यं।तत्रबालिकरणेमहादोषश्रवणात्॥ ॥अथतृप्तजपेयाद्व
तिपूर्वीणांगायत्रीं३सप्तवा७सकृत्त्रिर्वाएतोधीःपितृमंत्रान्पुरुषसूक्तमप्रतिरथमन्या
निचपवित्राणि॥ ॥एकवारमितिसकृत्वात्रयमितित्रिंअन्नसंख्याम्पार्श्याएानेयंद्वि
त्रिचतुर्भ्यःसूत्रइतिसूत्रेणोपपादितेनत्रीमन्नेसूत्रभतमयःएकसस्सकृत्त्वेतिसूत्रेणैकस्य
सकृदादेशःसूत्रप्रत्ययश्चीकार्यः।अथतृप्तब्राह्मणेषुगायत्रीपूर्वांगायत्रींसप्रणवांस
कृत्त्रिर्वाजपेत्।संहितास्वरेणपठेत्।तत्रायंक्रमः॥प्रणवंमात्रमुंजीतव्याहृतीस्तद
नंतरं।सावित्रीचानुपूर्वेणततोवर्णान्समुच्चरेत्।एकोधीःकएनश्चपाजइत्याद्याःपंच
र्चः।पितृमंत्राउदीरतामवरइत्याद्याःत्रयोदशर्चःपुरुषसूक्तंसहस्रशीर्षेत्याद्याःषोड

श्रि

एम० ९

१८

र्चः।अप्रतिरथंआशुःशिशानइत्याद्याःसप्तदशर्चोद्वादशर्चोवा।अन्यानिहृद्भम
तीनिअग्नयेकव्यवाहनायस्वाहेत्यादीन्यपितृमंत्रान्जपेत्।अत्रजपस्यपदेशस्तान
स्वबोधनार्थःमनुःस्वाध्यायंश्रावयेत्पित्र्येधर्मशास्त्राणिचैवहीति।मत्स्यपुराणेविशे
षः।ब्रह्मविष्णुरुद्राणांस्तोत्राणिविविधानिचइंद्रसूक्तसोमसूक्तानिपावमानीश्चशक्तितः
बृहद्रथंतरंतज्ज्येष्ठसामसरौरवं॥मंडलब्राह्मणंतद्वप्रीतिकारीचयत्पुनः॥विप्राणा
मात्मनश्चैवतत्सर्वंसमुदीरयेत्॥इंद्रादिसूक्तानिऋग्वेदेप्रसिद्धानिपुनंतुमेत्याद्याश्च
पावमान्यः॥त्वामिद्धिहवामहइत्यस्यामयोनिपतेयत्रद्वृहत्साम।अभित्वाशूरनोनुम
इतिरथंतरं।मूर्द्धानंदिवइतिज्येष्ठसाम।पुनानःसोमेतिरौरवं।ऋचंवाचमितिरूपांतिका
ध्यायः।यदेतन्मंडलंतपतीत्यग्निरहस्येमंडलब्राह्मणंप्रसिद्धं।इयंपृथिवीत्यवृहदारण्य
केमधुब्राह्मणं॥गारुडपुराणे॥योविष्णुहृदयंमंत्रंश्राद्धेषुनियतःपठेत्।पितरस्त
पितालेनेपयसाघृतेनच॥चतुरभिश्चचलभिश्चद्वाभ्यांपंचभिरेवच।हूयतेचपु
नर्द्वाभ्यांसमेविष्णुःप्रसीदतु।यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु।न्यूनंसं

श्रा ४

म७

१८

पूर्णानां पातिस घोवं घेत म्रुमस्नुत मिति॥ विष्णुरूपमेत्रा ओंश्रावयेति चत्वारि अक्ष
राणि॥ अस्तुश्रौषट् इति चत्वारि यजेति द्वे। येयजामहे इति पंच। वौषट् इति द्वे। एतै
र्योरूपतेस यज्ञपुरुषो विष्णुर्मम प्रसीदत्विति। एतेनुसारि श्राद्धपर्यंवाक्यं। तद्दैत
घ्रस्याप्यातयामोश्रावयेत्यादिरूपं ओंश्रावयेति चतुरक्षरं अस्तुश्रौषट् इति चतुरक्ष
रं यजेति द्व्यक्षरं येयजामहे इति पंचाक्षरं द्व्यक्षरो वषट्कार इति। उक्तजपासंभवे मत्स्य
पुराणे। अभावे सर्वविद्यानां गायत्रीजपमाचरेदिति॥ ॥ब्राह्मणान्नात्वान्नं प्रकीर्य स
कृत्स्नकृद्यो दत्वा सर्वद्विजपंक्तीजपित्वा मधुमती मंत्रः सर्वस्मिन्निकमन्नाद्यं सन्नीया
ग्नावारिणा॥ परिक्षिपेत् कृतनाम्नतो वि। केन्नुवि। इहस्पतिः। सोरकं विकरेद
न्नमंत्रं चेमं समुच्चरेत्। अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यंतु तृप्ता
यांतु परां गतिमिति। तत्रैवं सर्वमन्नमेकत्रपात्रे कृत्वानुविसतिलमुदकं निषिंच्यान्वमेत्।
ब्राह्मणानामग्रतोन्नं प्रकिरेदिति कर्काचार्याः पंक्तिमूर्द्धन्यस्योत्तरदिग्भागोरत्निमात्रे
विकिरं दद्यादिति हेमाद्रिः। तीर्थश्राद्धे विकिरभावः। विकल्पकरितिर्वास्या ब्राह्मणपेहना।

यान्तेन

एस॰

६२

२४

१८

मधुमध्विति च ७॥ तृप्तान् ब्राह्मणान् शात्वा ॥ अनं
ब्राह्मणानामग्रतोऽन्नं प्रकीरयेदिति

त्रि

तेनवैश्वदेविकद्विजपूर्वकमेकैकस्य पाणौ तृप्ताणोशनार्थं सकृत् सकृदुदकं दद्यात्। एवं च
दितिप्रणवेन व्याहृतिभिश्च सर्वेणापि गायत्री सकृज्जपित्वा। मधुमतीरिति मधुवाता इतिति
स्रः ऋचऽरव्यं तेमधुमध्विति चेति मधुमधु त्रेवंत्रिरुच्चारणं कर्तव्यं॥ ॥तृप्ताः स्थ इति पृ
च्छति॥ ॥ब्राह्मणांतृप्ताः स्थ इत्येवं ब्राह्मणान्प्रति पृच्छति मध्ये करोति। अत्र बहुवचनात्सर्वे
प्रष्टव्याः॥ ॥तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे द
र्भेषु त्रींस्त्रीन् पिंडानवनेज्य दद्यात्॥ ॥ततस्तैर्द्विजैः तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञा
प्य उर्वरितस्यान्नस्यान्नं तां द्रव्यापपित्वा सर्वमन्नं सर्वप्रकारं माषान्नं वर्जं पिंडपर्याप्तं एक
स्मिन्पात्रे उद्धरेत्। दर्भेषु त्रींस्त्रीन् पिंडान्निति दर्भग्रहणं ग्रपमूलसकृच्छिन्नोपलक्षणार्थं
। त्रींस्त्रीन्निति वीप्सा मातामहाभिप्रायेण। पिंडपितृयज्ञवदुपचारादिति सत्रित त्वादत्र पिंड
पितृयज्ञवत्पिंडदानं। तेनोल्लिखनस्य परहताद्यपरेणाबोल्मुकं पुरस्तात्करणं तीमानश्वव
पस्कन्नं खजमानलोमानि वेमंतं लप्स्यते। अत्राह याज्ञवल्क्यः। सर्वमन्नमुपादाय स
तिलं दक्षिणामुखः। उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवदिति॥ तात्र पदार्थक्रमः

शकादि ७

१९

ज्ञेसनं।उदकालंभः।उल्मुकनिधानं।अवनेजनं।सकृदाछिन्नास्तरणे।पिंडदानं॥अत्रपितृदतु
की क्रोदच्छातमनं। आद्यत्नजपः।पुनरवनेजनं।नीवीविसर्गः।नमोवदनिषणनमस्कार
ः।सूत्रदानं।समस्तुक्तं पूजनं इतिक्रमः। आचांतेष्वित्येके॥ ॥एके आचार्या आचांतेषु
ब्राह्मणेषु पिंडदानमिच्छंति॥ ॥आचांतेषुदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यात्॥ ॥
ब्राह्मणेषुकृताचमनेषुशालूतेभ्यउदकादिकंच दद्यात्पुष्पाणिचाप्रतिषिद्धानि। पद्मो
त्पलमल्लिकायूथिकाशतपत्रचंपकादीनिगंधरूपसंपन्नान्यपि दद्यात्तत्राप्रयोग
उक्तः छंदोगपरिशिष्टे। अथात्र भूमिमासिंचेत्सोदकमिति॥शिवा आपः संत्विति युग्मान्
वोदकेनवासौमनस्यमस्त्विति पुष्पदानमनंतरं। अक्षतं चारिष्टं चास्त्विति अक्षतान्प्रति
पादयेत्। अक्षय्योदकदानं तु अर्घदानवद्दिष्यते। षष्ठ्यैव नित्यं तत्कुर्यान्न चतुर्थ्या कदाचन।
पुष्पाणीति हविःपदं। प्रकरणात्। पित्र्याद्युल्लेखाभावाद्गंधनिक्षेपमात्रस्य विधानात् इदं ज
लादि त्रिकं दैवे पित्र्ये च कार्यं। यज्ञोपवीतनादेयमिति निर्णयः सर्वधर्मवार्ताः।तथाच [illegible] तात
पोपि।तथः पुष्पाणि सनेनोदकानि पयुक्तपयुरिति।इदंजलादिदानंदैवेसव्येनपित्र्येतप

सु०

व०

एम०
१९

एव५

सव्येनेति कर्कोपाध्यायः।हस्तेप्रतिपादितानामपांविरोधाद्ण्येप्रयोजनाभावाद्भुवोदृष्टोस्था
पनमेवापुष्पाणां।तत्र ब्राह्मणाः यजमानाय पाणिं प्रयच्छंति।मत्स्यपुराणे॥ आचांतेषु पु
नर्दद्याज्जलपुष्पाक्षतोदकं। दत्वाशीः प्रतिगृहीयाद्द्विजेभ्यः प्राङ्मुखो द्विजेभ्यः प्राङ्मुखो द्वि
जः। अक्षय्योदकवाक्येन दत्वान्नपानं देवानां समप्रार्थनसंबंधीजं तलमभिधीयते॥ अत्र पित
ब्राह्मणेभ्य इति कर्कः। सर्वेभ्यो दद्यादिति स्मृत्यर्थसारे॥ ॥अघोराः पितरः संत्विति मुक्ते गो
त्रं नो वर्धतां वर्धतामिति मुक्ते दातारो नोभिवर्धंतां वेदाः संततिरेव च।श्रद्धा च नो मा व्यगम
द्बहुदेयं च नो।स्त्विति॥ ॥आशीः प्रार्थनं प्रपंच यंति।तत्र यजमानः अघोराः पितरः सं
त्विति ब्रूयात्। ब्राह्मणाश्च संत्विति ब्रूयुः।ततो यो [illegible] यजमानोर्वर्धतामिति आह। ब्राह्म
णाः [illegible] श्रद्धा च नो मा व्यगात् इति यजमानः।मा व्यगादिति ब्राह्मणाः। बहुदेयं च नोऽस्त्विति क
ते। अस्त्विति ब्रूयुः। अत्र मनुः। दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन्दा
ति॥ ॥आशिषः प्रतिगृह्य स्वधावाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयि
ष्य इति पृच्छंति॥ ॥उक्तप्रकारेण आशीर्ग्रहणं कृत्वा स्वधावाचनीयसंज्ञकान्सपवित्रा

गोत्रं नो

अवर्द्धतामित्युक्ते॥दातारो नोभिवर्द्धंतामिति ब्रूयात्॥द्विजैः वर्द्धतामित्युक्ते॥ कृता वेदाः वर्द्धतामि
ति ब्रूयात्॥वर्द्धतामित्युक्ते॥संततिर्वर्द्धतामिति यजमानः॥वर्द्धतामिति ब्राह्मणाः॥२

कुशान्यास्तीर्य पिंडसमीपभूमौ स्तृत्वा स्वधां वाचयिष्य इति पंक्तिमूर्द्धन्यं सर्वान्वा पृच्छेत्।
सपवित्रानक्षतान्निस्सर्य॥ युग्मपात्रोपरिस्थितपवित्राण्यर्घ्यपवित्राण्यन्यपवित्रैः
सह समानीय पिंडानां पश्चिमतो दक्षिणाग्रान्निधाय स्वधां वाचयिष्य इति पृच्छे
त् इति हेमाद्रिः। सकुशानि पवित्राणि पिंडानामुपर्यास्तीर्य स्वधां वाचयिष्य इति पृच्छे
दिति देवयाज्ञिकाः॥ ॥वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः [illegible]
प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामिति
॥ ॥तैरस्तु स्वधेत्युक्ते वाच्यतामित्यनुज्ञातः पितृभ्य इत्यादि स्वधोच्यतामित्येवं मंत्रमुदाहरेत्
॥ ॥अ[illegible]स्तु स्वधेत्युच्यमाने स्वधावाचनीयेषु पवित्रेषु निषिंचेदूर्जमिति॥ ॥अस्तु स्वधे
त्युच्यमाने सति स्वधावाचनीयेषूदकं निषिंचेदूर्जमित्यनेन मंत्रेण। आसेचने यो[illegible]र्गो
[illegible]भाविभ्यावः॥ अवसाने निर्देशः छांदसः॥ अतो विद्धि श्राद्धे स्विभवती। मंत्रश्चार्थे समवे
तार्थः। अतो समातृकश्राद्धे मातृभ्यः पितामहीभ्य इत्याद्यूहः। संख्या समवेतार्थः। अत
श्चैको दिश्येनोहः॥ ॥उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यः॥ ॥अर्घ्यानं

यं पमात्रं मुक्तीकृत्तं तदुत्तानमूर्द्धमुखं कृत्वा यथाशक्ति दक्षिणां दद्यात्। शक्तिमनतिक्रम्य य
थाशक्ति। अत्र शतपथी श्रुतिः॥ स एष यज्ञो हतो न ददे यद्देवा दक्षिणाभिरदृंहन्यत्तेन
यद्देनं दक्षिणाभिरदृंहन्यत्तस्माद्दक्षिणा नामेति स्मृतौ॥ गोभूहिरण्यवासांसि क्रमाद्भव
नभूषणं। दद्याद्यद्दिष्टं विप्राणामात्मनः पितुरेव चेति। अदक्षिणं श्राद्धं च न कुर्यात्। तथा च
आदद्याद्यद्दिष्टं विप्राणामात्मनः पितुरेव चेति। अदक्षिणं श्राद्धं च न कुर्यात्। तथा च श्राद्ध
कल्पे। न कुर्याद्दक्षिणाहीनं दहेत्श्राद्धमदक्षिणमिति। तथा च शातपथब्राह्मणे। तस्मान्नाद
क्षिणं हविः स्यादिति॥ ॥विश्वेदेवाः प्रीयंतामिति दैवे वाच पित्र्या वाजे वाज इत्यनया वि
सृज्य॥ ॥वाचयित्वेति कारितत्वाद्ब्राह्मणा भवति। विश्वेदेवाः प्रीयतामिति। ब्रूहीति दैवब्रा
ह्मणौश्च विश्वेदेवाः प्रीयंतामिति ब्रूयुः। ततो वाजेवाजेवत इति मंत्रेण विप्रान्विसर्जये
त्। विसर्जनं तु पितृपूर्वं। तथा च याज्ञवल्क्यः। वाजे वाजे इति प्रीतः पितृपूर्वं विसर्जयेत्। इति
। निमंत्रणादि पदार्थजातं दैवपूर्वं भवति। विसर्जनं तु पितृपूर्वमिति मेधातिथिः। देवलो
पि। पूर्वमुत्थापयेत्पित्र्यान्वाच्यतामिति च ब्रुवन्। उत्थितानऽनुगच्छेत्तु तेभ्यः शेषं च संहरेत्।

।। पश्चादुत्थापयेद्विप्रान्वैश्वदेविकसंज्ञिकान् ।। २

पश्चात्तु वैश्वदेविकान्विप्रानुत्थापयेत्तत्तु तेभ्यः शेषं च संहरेत् पश्चात्तु वैश्वदेवपर्यन्तम् ।
एते हि पूर्वमासीना समुत्तिष्ठन्ति पश्चिमा इति ।। ।। आमावाजस्येत्यनुव्रज्य प्रदक्षिणी कृ
त्योपविशेत् ।। ।। आमावाजस्येति मंत्रेणानुव्रज्यानुपश्चाद्द्विजान्नीमान्तं ।। तान्स्वयोहं
म विशेत् ।। ।। इति गदाधर भाष्ये नवमी कण्डिका समाप्तम् । विषुवत्सूर्य संक्रांमो
व्यतीपातो गजच्छाया ग्रहणं युगादिमन्वादय वा दर्श तथा विशिष्टदेश ।। ।। ।।
।। ।। ।। ।।

पः ।। ।। हे पत्स्वदक्षिणा श्राद्धावनी प सम्प्राव सघ्या त्रिमाश्पन्ना त्रिः त्रिणा । चिकेत ० । अध्व
र्युवेद माग स्तद्गतं च तद्भ पर्यो धीते पश्चकरो । तेसो पित घोग त्रिणाचिकेतः । त्रिमधु
५ ।। वेदैकदेशः तदधीते तद्व्रतं चरति यः स त्रिमधुः ।। ब्राह्मोढापुत्रः ब्राह्मविधाहपरिणी
तापुत्रः वागीश्वरो विद्वान् ।। ।। अभावेप्येकं वेदविदं पंक्तिः मूर्द्धनि निपुंज्यात् सहस्रात्
पंक्तिं पुनातीति वचनात् ।। इति नवकण्डिका गदाधरभाष्ये अष्टमी कण्डिका । अथ काम्यानि भवंति
त्रिपौम प्रतिरूपाः प्रतिपदि द्वितीयायां २ स्त्रीजमाश्वाष्टमी पापां चतुर्थ्यां क्षुद्रपशवः पुत्राः पंच

अथ प्रयोगपद्धतिः ।। तत्र कालः ।। अमावास्याऽष्टका वृद्धिः कृष्णपक्षोऽयनद्वयं ।। विषुव सूर्य संक्रा
मो व्यतीपातो गजच्छाया ।। ग्रहणं युगादिमन्वादयश्च ।। तथा विशिष्टदेशो
गयादौ विशिष्टकाले च महालयादौ द्रव्य ब्राह्मणसंपत्सु चात्मरुचि श्राद्धस्यापाः कालाः ।। ।। अथ
श्राद्धाधिकारनिर्णयः ।। ।। प्रमीतयोः पित्रोर्मुख्याधिकारिणः स्वपुत्राः श्राद्धं कुर्युः तदभावे दत्तपुत्र
ः पौत्रः पुत्रिकापुत्रो वा । तदभावे सहोदरः स्तत्संततिर्वा तदभावे पुरोहितः तदभावे भार्या
स्वहस्तेन कुर्युः । सर्वाभावेन पतिस्तज्जातीयैः कारयेत् । नृपतिः सर्ववर्णानां बांधव इति स्म
रणात् । ब्राह्मविवाहोढा साध्वी पितुः पुत्राभावे पत्न्येवाधिकारिणी । पद्दिक्कपक्रितान भक्ति
क पक्रीतातु पानाहीन सापत्नी विधीयते । न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः । सर्वाभा
वे ... वो काश्ववदमंत्रकं श्राद्धे द्वेधिका ए । एक एव वेत्पुत्रस्तदा सावनुपनीतो पि कृतचौलश्चेद्दर्भ
त्रकं श्राद्धं कुर्यात् । अपुत्राणां पत्नि दिघात्स पुत्रापाश्च न कं चित् । पित्रा श्राद्धं न कर्तव्यं पु
त्राणां च कदाचन । भ्रात्रा नैव कर्तव्यं भ्रातॄणां च कनीयसां । अपि स्नेहेन कुर्याच्चेत्सपिण्डीकर
णं विना । यायां नु विशेषेण ज्यायानपि समाचरेत् । ब्रह्महापि वा दृश्यति पमाभावे पिमीता
पस्य कस्यापि वर्णस्य श्राद्धं कृते महत् फलमाह । शातातपः । प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां व
र्णलिंगिनां । एवं कुर्वन्नरः सम्यक् महतीं श्रियमाप्नुयात् । ब्राह्मणो वा स्ववर्णस्य पः कर्णगुरु

तदभावे पत्नी दायहारिणी ।। तदभावे सपिंडाः ।।
तदभावे समानोदकाः ।। तदभावे शिष्याः ।। तदभावे ऋत्विगाचार्यौ ५

२२

र्व्विदौहित्रो न दूषणत्वमवाप्नोतीह लोके यस्माद्दौहित्रेणानुतस पिंडीकरणादिष्वनिरेकेणाप
दायदापितृश्राद्धं च तदा तदा मातामहश्राद्धं कर्त्तव्यमेव पितरो यत्र पूज्यंते तत्र माता
महा अपि। अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्। तत्पिंडप्रत्यपत्तिरिक्तविषयं। अन्व
ष्टकासु पूर्वेद्युस्तर्पणे न तथैव पश्चादन्वष्टक्यां त्रिपार्वणां सपिंडीकरणे पुनर्द्वौ न हि
दौहित्रः तेन तवश्यं नवश्राद्धाद्यपि कार्यमेवाश्रयाहेतुः कन्यार्वणामेव सापिंड्यकानामेको
द्दिष्टं वा। योषितश्चाददीतास्तस्मै वश्राद्धं कुर्यादिति स्मरणात्। मातामहानं नवश्राद्धं अवश्यं
धनहारिणा दौहित्रेण कार्यं दौहित्रेणार्थनिःकर्त्तव्यं कर्त्तव्यं विधिवत्सदा। आदेहपतना
त्कुर्यात्तस्य पिंडोदकक्रियां पत्नीकेवलं मातामहेन संबंधः पुत्रिकापुत्रः मातामहस्येव
नियमेन श्राद्धं कुर्यात्। पुत्रिकापुत्रश्राद्धे विशेषमाह। मनुः। मातुः प्रथमतः पिंडं निर्वपेत्पु
त्रिकासुतः। द्वितीयं सितुस्तस्यास्तृतीयं प्रपितामहः। द्व्यामुष्यायणे पुत्रिकापुत्रे उशनसो
क्तो विशेषः। मातामहं तु मात्रादिस्येन कं पितृपूर्वकं मातृतः पितृतो यस्मादधिकारे स्थितधर्म
त इति। क्षेत्रजे तु द्व्यामुष्यायणे देवलोक्तं। द्व्यामुष्यायणकाद्युद्दीश्यो पिंडोदकं पृथगिति। द्वा

तु

त

एम०
२२

पितुः

र्थानिपितृणां ताभ्यामिति स्मर्यः॥ द्वौ पिंडौ दद्यात्तस्यास्त्रिंडे पिंडे ह्निनामतः॥ षण्णामंत्रत्रयः पिंडाणं एकैकं तु
ष्टपेहनि। पोषकः प्रथमः। ततो जनकः। अत्र क्रमविशेषमाह मरीचिः। सगोत्रो वान्यगोत्रो वा यो
भवेद्दक्षिणस्सुतः। पिंडश्राद्धे द्विधानं च षष्ठी त्रिणोपासि निर्वपेत्। बीजिने तु ततः पश्चात् षष्ठी त्रिजीवतिचे
त्कचित्। बीजिने दद्युरद्दौ तु मृते पश्चात्समीपनरिति। जीवत्पितृकस्यापि क्वचित्क्वचित् श्राद्धाधि
कारः। पत्नुमैत्रायणीयपरिशिष्टे विशेषो दर्शितः। उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे। ती
र्थे ब्राह्मण आयाते षडेते जीवतः पितुः। पुत्रस्य श्राद्धकाला इति शेषः। जीवत्पितृकस्य मतिपदि
मातामहश्राद्धं फलातिशयप्राप्तये नियमेन कार्यं। जातमात्रोपि दौहित्रो विद्यमानेपि मातु
ले। कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते इति॥ ॥ अथ श्राद्धे ब्राह्मणलक्षणं॥ ॥ तत्र म
हाभारते। विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि। पांक्तेयाः पांक्तिपावनाः मित्त्रे पास्ते पांक्तेया
वानाः। त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित्। ब्रह्मदेयानुसंतानश्छंदोगो ज्येष्ठसाम
गः। मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः। ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा। वे
दविद्याव्रतस्नातो विप्रः पंक्तिं पुनात्युत। अथर्वशिरसोध्येता ब्रह्मचारी यतव्रतः। सत्यवादी ध

ऋतादौताः

२३

मिशीलः स्वकर्मनिरतश्च यः। पितृपुत्रपौत्रस्तुतीर्थेषु अभिषेककृतश्रमाः। मन्त्रेषु च समन्त्रेषु मंत्रस
वभयपस्तुतास्त्रक्रोधना ह्यचपलाः श्राद्धे पूज्यास्तनो द्विजाः। सर्वभूतहितास्तेभ्यश्राद्धे दैवता
न्निमंत्रयेत इति। पयोक्तगुणब्राह्मणाभावे किंचित् हीनगुणा अपि श्राद्धे विकार्ये उपवेशनीयाः।
पित्रैर्तपयोक्तगुणाभावे मातामह मातुलस्वस्रीयश्वशुरदौहित्रजामातृकत्वगुरुयाज्यशिष्या
अपि गुणवन्तश्चेच्छ्राद्धे भोजनीयाः॥ अर्थेकस्यापि ब्राह्मणस्यालाभे अनुकल्पोत स्मृत्यंतरे अभा
वे संदृशो अलाभे ब्राह्मणस्यैव कौशः कार्ये विदुः। अपि पोएवमाप्याचरेच्छ्राद्धं षड्द्वेदसंसमाहितः।
विभक्तिं कारयेद्यस्तु पितृहा स मजापते। कौशः कुशमयः। बैठुं लघुमनुष्यप्रकृतिः। तंव
टुं ब्राह्मणत्वेन परिकल्प्य सर्वं श्राद्धं समाचरेत्। विभक्तिः कर्मण्येरलोप इति या वाचनं
न कुर्यात्। तथा पत्न्याभावे ऽपि लंकृत्वा पितृयज्ञविधिं नरः। निधाय वाद्भविराना सनेषु
समाहितः। प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत्। सर्वाभावे क्षिपेदग्नौ गावे द्यादाथ
वेत्तेन मामसम्पलोयो स्ति पैतृकस्य विशेषनद्दति देवलः। प्रैषानुप्रैषसंयुक्तमिति श्राद्धं
प्राप्यमस्तु संपन्नमित्यादिप्रश्न प्रतिवचनैः स्वयमेव वदेदित्यर्थः॥ ॥ अथ नियमाः। मनो
यथोक्तगुणास्तस्य भोज्याः॥ गयायां तु निगुणा अपि तत्र स्थाश्चाद्धिजा भोज्याः ४

पै

ए०
२३

श्राप

वर्णक्रमेभिर्हिंसा निमंत्रित ब्राह्मणपरित्याग आसनं बूलहृदकर्मास्मिन् जनदंतधावनपरिस्रा
वश्च॥ ॥इति कर्तृनियमाः॥ ॥इति कर्तृनियमाः॥ ॥निमंत्रणमस्वीकृत्यानपक्रमणमस
त्राभोजनमेकत्र निमंत्रितस्यान्येषामन्नादेरग्रहणं मद्यचुलुस्पकुतपकालाद्यनतिक्रम
णं॥ ॥इति द्विजनियमाः॥ ॥निमंत्र्यौ तु पशिश्राद्धे ब्राह्मणाति रिक्तभोजन पुनर्भोजनाध्वभवह
नाशौचमत्वरितत्वमत्तौ स्वदारेष्वपि निमुक्तस्यापि मैथुनाकरणं विशेषतः शूद्रायाः परिह
रणं अध्यायाध्यापनक्रोधक्रौर्यकलह घूतभारोद्वहन प्रतिग्रह प्रमाद मद मोह लोभाहंका
रकार्पण्यपस्त्यं पर्वज्यं सैर्याः इत्युभयनियमाः॥ ॥अथ पश्चाद्दिना प्राचीनदिनकृत्येऽतिक
र्मोत्तरे निर्णयमुक्ता ब्राह्मणनिमंत्रणं प्रदोषे वा तेकरोति। विप्रभुक्त्यग्न्ये प्राणाया
मं त्रयं कृत्वा यज्ञोपवीती उदड्मुखः प्राड्मुखस्य द्विजस्य दक्षिणं जानूपस्पृश्य दैवेक्ष
णः क्रियतामिति निर्देन मंत्रयेतिप्रत्युक्तिः। प्राप्नोति भवानित्युक्तेप्राप्नुवानीति प्रत्युक्तिः।
ततः अक्रोध नैरित्यादि श्रावयेत्। एवं मातामहविश्वेदेवश्राद्धेऽपि निमंत्रणम्। ततः प्राचीना
वीती दक्षिणामुखः उदड्मुखद्विजस्य दक्षिणं जानूपस्पृश्य पित्र्ये क्षणः क्रियतामिति निर्दे

ण

श्रु २
न ४

२४

उतथेतिप्रत्युक्तः। ओं प्राप्नोतिभवान्‌ इत्युक्ते प्राप्नवानीतिप्रत्युक्तिः। ततस्त्वक्रोधनैरित्यादिश्रावये
त्‌। एवं मातामहविश्वेदेवसंबंधिनमंत्रणं। ततः प्राचीनावीती दक्षिणामुखस्तु दक्षमुखद्विजस्य द
क्षिणं जानूपस्पृश्य पर्वेत्‌ अमुकगोत्रस्यामुकशर्मणोस्मत्पितुः सपत्नीकस्य श्राद्धे क्षणः क्रिय
तामित्यादि। एवमस्मत्पितामहस्यास्मत्प्रपितामहस्येत्यादि निमंत्रणं कृत्वा माता
महद्विजान्निमंत्रयेत्‌। यावत्संख्याश्च पितृद्विजास्तावत्संख्या एव मातामहद्विजास्तथैव नि
मंत्रणीयाः। ततोक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धक
र्मणि। इति नियमान्‌ श्रावयेत्‌। तंत्रे एवावैश्वदेविकं। इति श्राद्धदिनात्पूर्वदिनकृत्यं। श्रा
द्धदिने निमंत्रणं संभवे श्राद्धदिने प्रातर्निमंत्रणं॥ ॥अथ श्राद्धदिनकर्म॥ तत्र दंतधावनवर्जं
प्रातःकालीनं कर्म कृत्वा उद्वर्तनद्रव्यस्तानीयतिलामलककल्कान्‌ ताम्रपात्रे संभृतान्‌ कृतस्न
कृततैलेभ्यो निमंत्रितद्विजेभ्यो दैवपूर्वकं मेष्यद्रव्यदापनं। ततः पाकभूमेर्गोमयोपलेप
नादिसंस्कारकरणं महानसे वाससचैलस्नातः सपत्नीको यजमानः स्वयं पाकमारभेत। अ
संभवे तु शुचिभिः स्नातैः सवर्णैर्वा कारयेत्‌। ततः श्राद्धसंभारोपकल्पनं। अपराह्णः षष्ठे मुहूर्ते

एपा०
२४

पर्तिया। अन्यगोत्रान्यस्य श्राद्धे पाकः कार्यः

नयादौ नित्यस्नानं। ततः कर्माङ्गस्नानं। ततः श्राद्धार्थमुदकमानीय पवित्रपाणिः शुचिः श्र
द्धावान्‌ श्राद्धदेशमागत्योदकं सर्वत्र प्रोक्षयेत्‌॥ ॥अथापराह्णकृत्यं॥ ॥तत्रोक्तकालागतद्वि
जान्‌ दृष्ट्वा भवन्तः स्वागतमिति प्रत्येकं ब्रूयात्‌। सुस्वागतमिति द्विजैर्वक्तव्यं। ततस्तेभ्य उद
कदानं। मंडलकरणं। आचमनार्थं जलदानं। तैश्चाचमनकरणं। ततो यजमानस्य पादप्र
क्षालनपूर्वकं द्विराचमनं। ब्राह्मणानामुपवेशनं। अस्मिन्नवसरे दीपानां स्थापनं। ततः क
र्तोपविश्य अपापायै नमः। ब्राह्मणाय नम इति वदेत्‌। पुंडरीकाक्षं स्मृत्वा। देवताभ्यः पितृभ्यश्च
महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नम इति त्रिः पठेत्‌। ततः देशकालादि
कालसंकीर्तनं कृत्वा अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानां सपत्नीकानां वसुरुद्रादित्यस्वरू
पाणां तथा मातामहादीनां संकीर्तनं कृत्वा पार्वणविधिना अमुकनिमित्तं श्राद्धं करि
ष्ये इति संकल्पं कुर्यात्‌। ततो निहन्मि सर्वं यदमेध्यवद्भवेन्निहन्मि सर्वान पितृन्‌ वाहणे
न। यक्षांश्च रक्षांसि पिशाचगुह्यकान्‌ हता मया यातुधानाश्च सर्वे इति पठेत्‌। नीवीबंधनं। तत
स्तिलान्‌ हंतलक्षणेन। दर्भान्‌ हंतुं एहि सान्‌। पंक्तिवैभ्यो त्रिपान्‌ संविदति श्रियः सर्वरक्षकः। इ

६१०

तिद्धारे निनुकुशान्निक्षेप ॥ अग्निष्वात्ता ॥ पितृगणाः ॥ आन्वां रत्नुमे दिशं । तथाव हि षड्
पांजुपाभ्यां येपितरः स्थ ॥ प्रतीच्यां मात्रपास्त ह्रु दीचीम पितरोमपाः । ऊर्ध्वं तिस्त्र
यमाद्वीत्कव्यवाहुन लोप्यधः । रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । रक्षां तिष्ठाभिष
स्तिषांपमोरक्षां करोतु मे । इतिपथ्यालिदिशिदिशितिलान्प्रकिरेत् । रक्षोभूतेतिसर्वतः प्रकि
रणं । ततः कर्मार्थं जलाभिमंत्रणं । इमे शीलोरपन्पद्देवाइति मुखेन । अतऊर्ध्वं जलकार्यमने
न । उष्टदष्टिनिपानन्नादिदूषितः पाकः पूतो भवत्विति पाकप्रोक्षणं । सत्यां पुरूरवाईवसंज्ञका
नां विश्वेषां देवानामिदमासनं । अपसव्यं । गोत्राणां पितृपितामहप्रपितामहानाममुकामु
कशर्मणामिदमासनं । एवं मातामहादीनां । सत्यं पुरूरवाईविसंज्ञकान्विश्वान्देवानावाहयि
ष्य इति प्रश्नः । आवाहयेति प्रत्युक्तिः । दक्षिणजानु मालभ्य विश्वेदेवासइत्यावाहनं । यवकि
रणं । विश्वेदेवाः शृणुतेमम्मितिजपः । आगच्छंतित्येपितृपेत । अथास्मं त्रेमुकगोत्रान्
पितृनावाहयिष्य इति प्रश्नः । आवाहयेति प्रत्युक्तिः । उशंतस्त्वेत्यावाहनं तिलप्रकिरणं । आयं
तुन इति जपः । एवं मातामहादीनां आवाहनं । ततः सव्यं कृत्वा वैश्वदेविकं पात्रं निधाय पवित्रांतः एप०

हिंतेशन्नो देवीरिति जलमासिंच्य अपसव्यं कृत्वा पितृपात्राणि निधाय पवित्रांतर्हितेषु शन्नो
देवीरिति जलासेकः । सव्यं यवोसीति धान्यराजो वा वारुणो मधुसंयुतः । निर्णोदः सर्वपापानां
पवित्रमृषिभिः स्मृत इति । इति यवप्रक्षेपः । यवोसि यवयेति मंत्रेण वा । यवपत्रे । तिलप
त्रे तु तिलोसीति मंत्रेण । तिलोसीति पितृ । पात्रेषु मंत्रावृत्त्या तिलप्रक्षेपः । सर्वपात्रे चंदन
पुष्पप्रक्षेपो देवपितृधर्मेण । सव्यं । वैश्वदेविकपवित्रदानां प्रजनं । पादिव्या इत्यर्घदानं
। एवं सर्वत्र । प्रथमे पात्रे संस्रवान्समवनीय पितृभ्यः स्थानमसीति पात्रन्युब्जीकरणं । तदु
परि कुशानिधानं । पुत्रकामश्चेत् संस्रववंदनं । आपः शिवा इति । ततो गंधादिदानं । तत्रैवं प्र
योगः पथ्यादत्तं गंधाद्यर्चनं पुरूरवार्द्रवसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा ॥ अपसव्यं कृत्वैवं
पितृभ्यो दानं । आचमनं प्राणायामः । ब्राह्मणाग्रे भाजनानि निधाय उल्मुककारेणामंडलानि
कुर्यात् । अपसव्यं । अन्नमुद्धृत्य अग्नौ करिष्य इति प्रश्नः । कुरुष्वेति प्रत्युक्तिः । अग्नये कव्य
वाहनाय स्वाहा । सोमाय पितृमते स्वाहेति होमद्वयं कुर्यात् । इदमग्नये कव्यवाहनाय न मम
स्वाहा । सोमाय पितृमते स्वाहेति होमद्वयं सोमाय पितृमते न ममेति द्वयोस्त्यागो । सर्पंकत के

मामामावर्तिहेमाद्रिपद्धतौ। कुशोर्ध्वपात्रे दत्वा पात्रमालम्भ्य जपः। पृथिवी ते इति प्रतिपात्रं मन्त्रावृत्तिः।
वैश्वदेवार्घ्यपत्रेषु यवान्गुष्ठमन्त्रेणावगाहनं। तिलविकिरणं। परिवेषणं। संकल्पः पूर्वोक्तप्रकारेण।
सकृत्सकृदुदकदानं विप्रहस्तेषु। ततः अश्नत्सु जपो पथ्योक्तः। तृप्तान्ज्ञात्वोक्तप्रकारेण। अन्नप्रकि
रणं। आचमनं। सकृदुदकदानं पूर्ववत्। पत्नी जपः। मधुवाता० ३ भवंत्वनः। मधुमधुमधु इति
जपेत्। तृप्ताः स्थ इति प्रश्नः। तृप्ताः स्म इति प्राप्तुक्ते शेषमन्नमप्यस्तीति ब्रूयात्। इष्टैः सह भु
ज्यतामिति प्रतिवचनं। हेमाद्रिणा कर्कमते पिंडार्थमुपयुज्यतामिति प्रयोगो दर्शितः। सर्व
मन्त्रमेकतो उद्धरणं। उल्लेखनमपहता इति। सावित्र्यस्य वज्रेण। इतरस्यतु कुशमूलेनाजलस्पर्शः।
अग्निमत उल्मुकनिधानं। प्रतिपार्वणं। अमुकगोत्रपितरमुकशर्मन्। अवनेजनं एवं पिताम
हप्रपितामहयोः। सकृदाच्छिन्नास्तरणं। अमुकगोत्रपितरमुकशर्मन्नेतत्ते अन्नं स्वधेति पिं
डदानं। इदममुकायन्नमस्मा एवमुभयत्र। सर्वत्र मातामहानामप्येवमेव विधिः। अत्र पितरो मा
दयध्वमनुदृग्गमनं। आवृत्य अमीमदंतेति जपः। पूर्ववदवनेजनं। नीवीविस्रंसः। नमो व इति षडं
जलिकरणं। एतद्व इति सूत्रदानं। पंचाशद्दार्घोर्णाह्रस्व यजमानहृदयलोम्नां वा दानं। पिंडपूजनं।

चंदनपुष्पधूपदीपनैवेद्यानि गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः स्वधेति। एभिः पिंडदानै
रस्मत्पितॄणामक्षय्यात् प्रीत्यर्थे अक्षय्यं भवतु इति प्रार्थना। आचमनं। सुप्रोक्षितमस्त्व
देशो वह्निति जलेन भूमिं सिंचेत्। शिवा आपः संत्विति उदकदानं ब्राह्मणेभ्यः। सौमनस्यमस्तु अस्तु
इति पुष्पदानं। अक्षतं चारिष्टं चास्तु इत्यक्षतदानं। अमुकगोत्रस्य पितुः अमुकशर्मणः
दत्तं श्राद्धं मुदकं चाक्षय्यमस्तु। एवं पितामहप्रपितामहयोः। ततो द्विजानां प्रार्थना। येषामुद्दि
ष्टं तेषामक्षय्यमस्तु। अस्त्विति प्रत्युक्तिः। अघोराः पितरः संतु संत्विति प्रत्युक्तिः। गोत्रं नो वर्धता
मिति प्रश्नः। वर्धतामिति प्रत्युक्तिः। दातारो नो अभिवर्धंतामिति प्रश्नः। वर्धतामिति प्रत्युक्तिः। वेदाः वर्धंतामिति
प्रश्नः। वर्धंतामिति प्रत्युक्तिः। संततिर्वर्धतां। वर्धतामिति प्रत्युक्तिः। श्रद्धा च नो मा व्यगमत्। मा गादिति प्र
त्युक्तिः। बहु देयं च नोस्तु। अस्त्विति प्रत्युक्तिः। पात्रोपरि स्थापित कुशानां भूमौ आस्तरणं। ततः
स्वधां पितृभ्यो वाचयिष्ये इति प्रश्नः। वाच्यतामित्युक्ते पितृभ्यः स्वधोच्यतां। पितामहेभ्यः स्वधोच्य
तां। प्रपितामहेभ्यः स्वधोच्यतां। मातामहेभ्यः स्वधोच्यतां। प्रमातामहेभ्यः स्वधोच्यतां। वृद्धप्रमाता
महेभ्यः स्वधोच्यतां मातामहे मातामहेभ्यः स्वधोच्यतामिति मंत्रं पठेत्। अस्तु स्वधेति प्र

२१

क्रौ। जप्त्वा तत्कुशेषु ऊर्जं मित्युदकाभिषेकः। पात्रोत्तानकरणं। ततोऽपसव्यं श्राद्धस्य प्रतिष्ठामित्यर्घ्यं दक्षि
णामुखत्वाद्दत्वा तांबूलं च विश्वेभ्यो देवेभ्यः स्वाहा। इदं न मम। अपसव्यं श्राद्धस्य प्रतिष्ठासिद्ध्यर्थं दक्षि
णाभिमुखत्वाद्दत्वा तांबूलं चामुकगोत्रेभ्यः स्वधा। इदं न ममेति संस्रावः। विश्वेदेवाः प्रीयंतामि
ति वदेत्। प्रीयतामिति प्रत्युः। ओं। विश्वेदेवाः शांतिदाः पुष्टिदाः वरदाः भवंतु। भवंत्विति द्विजाः
। अन्नं च नो बहु भवेत्। बहु भूयात्। अतिथींश्च लभेमहि। लभध्वं। याचितारश्च नः संतु। संतु
। मा च याचिष्म कंचन। मा याचिष्ठाः। एताः सत्या आशिषः संतु। इति प्रार्थना। स्वस्त्ययनमेव तिलकक
रणं। पिंडानां प्रत्यवधानं। स्वधा। पिंडावघ्राणं। स्वभद्रा छिन्ना मयि प्रत्तेऽपः। पश्चाद्दुल्मुकस्य
च। भाजनपात्राणि चालयित्वा संचरणमुत्तरणं। काकस्नानं कृत्वा अमुकपितॄणां कृतस्य
श्राद्धविधेर्न्यूनातिरिक्तं परिपूर्णमस्तु वाजे वाजे इति पितृविसर्जनं। आमा वाजस्येत्यनु
व्रज्य प्रदक्षिणीकृत्य गृहं प्रविशेत्॥ ॥इति श्रीमित्र [illegible] साम्राज्यपति श्री माहात्म्य त्रिक
वामनात्मज दीक्षित गंगाधर विरचिते कानीयसश्राद्धरत्नपद्धतौ पार्वणश्राद्धपद्धतिः॥ ॥
अथ साग्निकस्य अग्निकादीनां दर्शादिकादिश्राद्धनिमित्ततः पिंडाभाव उच्यते। तदाह कात्यायनः ए०

२१

जिनित्यं जीवंश्चाद्विवाहात्त्र्यब्दं वर्षार्धवर्षमेव वा पिंडान् सपिंडानो दद्युः सपिंडीकरणादृते। अत्र सपिं
डीकरणे पिंडविधानात् सर्वेषां उत्क्रांतमनुतीनां श्राद्धानामर्चा। पिंडदानमनुज्ञानमिति। उद्वा
हे कृतेऽपि महालये गयाश्राद्धे मृताहेषु पिंडान् दद्युः। तदुक्तं महालये गयाश्राद्धे मातापित्रो
र्मृताहनि। कृतोद्वाहोऽपि कुर्वीत पिंडैर्निर्वपणं सुतः इति। गयाश्राद्धे नतीर्थान्त्यपलक्षेपेते। मृताहनी
ति मातापितृभ्यां गृह्यते। इत्यनाम पितृमृताहे पुमासिके च। संग्रहेऽपि। विवाहोपनयाद्
र्ध्वं वर्षं वर्षार्धमेव वा। न कुर्यात् पिंडनिर्वापं न दद्यात्करणं निचा। करणमावाहनाद्यादी
नि विवाहादौ निमित्तेतो काकालपर्यंतम मावास्यायां कार्षं संकल्प्य श्राद्धं कुर्यात्। अकृ नि
बन्धा। पिंडपितृपत्रस्यकृभवत्येव॥ ॥अथ सांवत्सरिके विशेषः॥ ॥तत्र विभक्ताश्चेत्सर्वेनी
ज्येष्ठपुत्रा एव। मातृसांवत्सरिके पत्यौ धितं कुर्युः कार्यः। पत्न्यैव मातृत्वाद्भिन्नमारोहणेक
तंतत्रैकमेव पाकं कृत्वा पितृश्राद्धं पृथक् कृत्वा एकैकं बर्हिषि षट् पिंडान् दद्यात्। विप्रपंक्तौ
चामनीयाधिकं भोजयेत् — तिश्राद्धभावे एकदिनेऽनेकश्राद्धप्रसक्तौ पूर्वं पितुः प
श्चात् मात्रादीनां श्राद्धं कार्यं मृताहे ग्रहणं चेद्दामेन हस्त्याबा आह्निकं कार्यं ग्रहे श्राद्धो

२८

यातिप्रतिबंधेतदं तेकर्तव्यं। मातापितृसपाहे श्राद्धकर्त्तुः स्त्री कन्यकेवाश्राद्धे स्याद्रजस्वलाविसं
वमेहनिकुर्यात्॥ ॥अमहालये विशेषः॥ ॥तत्रोद्देश्यमनुक्रम्यते। पितृव्यभ्रातृ उत्रपितृ
ष्वसृभार्या पितृव्यपुत्र भ्रातृपुत्रि भगिनी दुहितृ भगिनेया चार्यश्वशुरश्वश्रू उपाध्या
यगुरुसखी द्रव्यद शिष्यादय इति सिंन्धावविशेषे वायुपुराणे विशेषो दर्शितः। संन्यासि
नोप्याब्दिकादि पुत्रः कुर्याद्यथा विधि। महालये तु पक्षाद्वादश्यां पार्वणेन तु॥ ॥अथ
भाद्रपदापरपक्षे भरणीश्राद्धे विशेषः॥ ॥तदुक्तं मात्स्ये भरण्यां पितृपक्षे तु महतीं परि
कीर्तिता। तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत्। तत्र सपत्नीक पितृपितामहप्र
पितामहान् सपत्नीकमातामहादीन्द्वौ उद्दिश्य सांकल्पश्राद्धं कुर्यात्। भविष्यपुराणे
। अग्नौकरणमर्घ्यं चावाहनं चावनेजनं। पिंडश्राद्धं प्रकुर्वीत पिंडहीने निवर्तते। पिंडनिर्वा
परहितं यत्र श्राद्धं विधीयते। स्वधावाचनलोपोस्ति विकिरस्तु न लुप्यते। अक्षय्यदक्षि
णास्वस्ति सौमनस्यं यथा स्थितिः। इति। चतुर्दश्यां पित्रादित्रयमध्ये एकस्य द्वयोर्वा विष
शस्त्रादिमृत्यौ तेन तयोः। पितृव्यादेर्वा तिष्यादि धस्येकोद्दिष्ट विधिना श्राद्धं कुर्यात्। इदं चै

एम० २८

२९

कोद्दिष्टं सदैवं तथा च संग्रहे पितृपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः। दैवपूर्वं तु तच्छ्राद्धं पितृ
णामक्षयं भवेत्। इति॥ ॥अथ तीर्थश्राद्धे विशेषः॥ ॥तत्र षडुपयोद्देशीन। तत्र द्विर्बंधा
वाहनार्घ्यं द्विजांगुष्ठतीर्थ विचारः। षडूरूपपिंडदानामंतरं मात्रादिपिंडप्रवर्तनः कुशेषु
ज्ञातिवर्गामुद्दिश्यैकोद्दिष्ट पिंडोदानमः। पिंडानां तीर्थसलिलेक्षेपः॥ ॥अथ नित्यश्रा
द्धे विशेषः॥ ॥संकल्पः पुष्पाद्यर्चनादिभिः आसनादि दीपांतोपचारैः ब्राह्मणपूजनं
मंडलं कृत्वा भाजनानि निधाय परिवेषणं आलंभादि ब्राह्मणभोजनं तत्कृत्वा किंचिद्दद्या
त्। नात्र कर्तृ भोक्तृ नियमाः। भोक्तृभोज्याद्यभावे अशक्तौ अन्नमुद्धृत्य यथाशक्ति ततः पोद्धृत्य विभज्य पि
त्रनुद्दिश्य सज्जेत्॥ ॥इति नित्यश्राद्धं॥ ॥सर्वश्राद्धप्रकृतिभूतं पार्वणमुक्त्वाधुना विकृ
तिभूतमेकोद्दिष्टमारभ्यते॥ ॥अथैकोद्दिष्टं॥ ॥अथ पार्वणानंतरमेकोद्दिष्टं व्याख्या
स्यते। अथात्वर्थसंज्ञा चैषा। एकमुद्दिश्य यत्क्रियते तदेकोद्दिष्टमिति। एकोर्घ एकं पवि
त्रमेकः पिंडः॥ ॥अस्मिन्नेकोद्दिष्टे एकार्घः एकं पवित्रमेकः पिंडश्च स्यात्। अर्घस्यैक
त्वश्रावणामात्रमप्येकमिति ज्ञायते। अतः प्रथमश्राद्धस्यानुपपत्तिः। पितृव्यः स्वान्

२९

मसीमस्यानुपपन्नत्वात्संस्रवस्य न हुत्वा भावाबात्र मुद्रीकरणाभावः॥ ॥नावाहनं नाग्नौकरणं
नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्था
नेभिरम्यतामिति विसर्गोभिरताः स्म इतीतरे॥ ॥एषष्ठमे तेत॥ अत्राग्नौकरणनिषेधा
द्देवपात्राद्यभावे विशेषोक्तः तच्छेषदानानंतरं संस्रवहितत्वात्॥ अप तं जुहोमीति मंत्रलिंगा
न हुतशेषस्यैव परामर्शात् हुतशेषाभावे पात्रालंभाव इति निश्चयप्रतिपत्तेरिति हलायु
धभाष्ये॥ ॥इति गदाधरकृते कातीयसूत्रभाष्ये चतुर्थी कंडिका॥४॥ ॥अथ प्रयो
गः निमंत्रणं तत्रैव मध्याह्नस्नानं ततः कर्मारंभः स्मार्तं। द्विजेभ्य उदकदानं। मंडलकरणं। द्वि
जैराचमनकरणं। पादप्रक्षालनं ब्राह्मणस्योपवेशनं। दीपस्थापनं। देवताभ्यः पितृभ्य इति पा
ठः। नीवीबंधनं। तिलाक्षतविकिरणं। अपहता इति दक्षिणदिशि प्रकरणानंतरं जलाभिमंत्रणं। पाकप्रोक्ष
णं। आसनदानं। हस्तप्रक्षालनं। नावाहनं नावकीरणं। न जपः। एकस्यार्घ्यस्य पूरणं। दानं।
न पात्रस्य कुब्जीकरणं। निसंस्रवं वंदनं। ततो गंधादिदानं। अग्नौकरणं। पात्रालंभो न भवतीति ह
लायुधमतं। अन्ने घासमतीत्युक्तमेव। अंगुष्ठमन्नेवगाहनं। तिलावकीरणं। संकल्पः। नुदकदानं। एप०

२९

जपः॥ अन्नप्रकीरणं। आचमनं। नुदकदानं। जपो पर्युक्तः॥ स्वदितमिति प्रश्नः॥ सुस्वदितमि
ति ब्राह्मणाः ब्रूयुः॥ शेषान्नस्यानुज्ञा मन्वादि। पिंडप्रज्ञां तं च पूर्ववत्। एकः पिंडो देयः॥ ततः
सुप्रोक्षितमित्यादि। अक्षतादानं। अक्षय्योदकदानं। उपतिष्ठतामित्यक्षय्यस्थाने प्रार्थना। दक्षिणां तं द
क्षिणादानं। न विश्वेदेवाः प्रियंतामिति प्रैषः। प्रार्थन्यापि न। तिलकं। पितृप्रश्नः स्वधानां स्वधाः अ
वधारणं। अभिमतउल्मुकप्रहरणादि छिन्नपोषणौ प्रक्षेपः। पात्रचालनं। संचरानुव्रजनं। ततो घ
च इति मादि। अभिरम्यतामिति विसर्जनं। अभिरताः स्म इति प्रत्युक्तिः। अनुगमनं। गृहप्रवेशः
॥ ॥इति नवकंडिकामध्ये भाष्ये एकोद्दिष्टपद्धतिः॥ ॥अथैकोद्दिष्टप्रसंगात्क्रियापद्ध
तिर्लिख्यते॥ ॥तत्र सापुहमाः हुतापांपजमानस्मरणं शंकाचेन देवैरदेवमातिएकाति
र्हनित्या। जीवेत्पुनः कालिमातएकातिनैव होनया। पौर्णमासेष्वनंतरं भाद्रशुद्धे पदापजमा
नमरणं शंकास्यान्न दैवपिंडपिंडपद्धवर्जितामभावास्येष्टिं कुर्यात्। तत्र पर्वतं पद्म होमः। आ
ज्यपमाणी हविषश्चेत्प्रिपेत तत्र हविषां दक्षिणाग्नौ प्रक्षेपः। मदहनप्रभ। तिप्राघविय
मादनाम एवं चेदु। हंपतेहविषां दहनं। आदनीनाकालमाहवनीयेप्य वंदेश्वदेवपर्व

हृतेपजमानसमरणोर्ध्वं कायामवशिष्टपर्वणांसमापनंकार्यमितिकलेसंभवेवाज्यंसंस्कृत
पुरोनुवाक्यायाज्याभ्यांस्वस्वहविषायागाःकार्याः।तदसंभवेचकेवलेभ्यान्येनचतुर्गृही
तेनप्रधानदेवतानांयागमात्रंकुर्यादिति।नसर्पसंभवेप्रतिदैवतंप्रणीताहुतिंजुहुयात।अ
ग्नयेस्वाहा।विश्वेभ्योदेवेभ्यःस्वाहेन्द्रायस्वाहेति।असन्नपतस्तदग्नयेविश्वेदेवेभ्यइन्द्राग्निभ्यामिति।एवं
स्थालीपाकादिकर्मसकलंज्ञेयं।असंभवेबहुहोमेदेवतानामाहुतिमात्रंवा।यद्यामावास्या
पर्यन्तंयजमानोजीवमितदामावास्यायांदक्षिणाग्निमुद्धृत्यपिंडपितृयज्ञःकार्यः।अन्याधा
धानं।नब्रह्मासनं।नचामावास्येष्टिःकृतत्वात्।सर्वकर्ममरणान्तंभवति।कर्तुरभावात्।
हविःप्रतिपत्तिविधानात्।अग्निहोत्रहोमेप्याहृतेहविषिदक्षिणाग्नेरग्रहणादिग्राणसाद
नाद्गार्हपत्येदहनं।आसादनाद्याहवनीयोएवमपदध्युर्यागाःसोमादावासवतःश्रमरणश्चेत्
यंपश्चात्संभवेसमापनंकार्यम्।मृतेपुत्रादिःकृतापसव्यःसव्यासकृत्क्षरिःश्मश्रूहत्वादिसंस्का
रकरणं।गार्हपत्याहवनीयदक्षिणाग्नीनांविहरणं।तिलएवस्थालवतीरेषवैदेहलध्वपुराहा
गार्हपत्याहवनीयदक्षिणाग्निषुतिसृणांगोमयपर्शाबल्लवतीनांमन्सयीनामुदकानामधिश्रय

एम०
३०

णं।अत्रसर्वकर्मापसव्येनदक्षिणामुखेनकर्तव्यं।तस्मात्सव्यपीडस्तावाधिश्रयणेनकुर्या
त्।तौप्रस्थ्याविवस्कल्पोर्मुख्येनिधायपनीयेते।सर्वास्थस्थालीषुचिहूकरणं।अथमरणं
।अथमरणस्थानेएकोद्दिष्टेनविधिनाश्राद्धं।तत्रसंकल्पः।मरणस्थानेएकोद्दिष्टश्राद्धमं
हंकरिष्येउपहासप्रोक्षणं।आचमनं।आमान्नसंकल्पः।पिंडदानं।आवाहनार्घ्यार्चपात्राल
मन्ताग्न्याहनविकिरावनेजनरेखाप्रत्यवनेजनानांधायर्कनान्तर्ष्योदकदानमाशीःस्वधावाच
नीयनिषेकाभावः।सव्येनदक्षिणादानं।दक्षिणाकालेमाषान्नजलसंपुक्तकुंभदानं।इतिम
रणस्थानेएकोद्दिष्टविधिनाश्राद्धं।ततोमृतस्थानेशवन्यासाप्पिंडदानं।अमुमुकगोत्रअमुक
शवइतिप्रयोगाः।सजलेमाषान्नंकुंभदानं।ततःशवर्वदेकोद्दिष्टविधिना।द्वितीयंद्वारदेशेश्राद्धं।
श्राद्धंतेतत्रैवपांथनाम्नापिंडदानं।पांथएतत्तेइतिप्रयोगाः।माषान्नजलसंपुक्तकुंभदानं।
संनापजानन्त्रीदायानक्षिशरीरमारोप्यदक्षिणाग्राममनं।यमगाथागायमानोयमसूक्तंवजपंत
इतिएकआहुः।अहरहर्नीयमानोगामश्वंपुरुषंजगत्।वैवस्वतोनतृप्यतिसुरयाइवदुर्मतिः।इ
तियमगाथा।अपेतोयंतुपणयःइत्ययमगाथायोयमसूक्तं।ततश्चत्वरेविश्रांतनाम्नापिंडदानंमाषा

३१

त्रजलयुक्तघटदानं। ग्रामस्य श्मशानयोरर्धमार्गे नीते तत्र पूर्ववदेकोद्दिष्टविधिना श्राद्धं। अमुक
प्रेतस्य दाहार्थं श्मशानी यमानस्यार्द्धमार्गे विश्रामस्थाने श्राद्धमहं करिष्य इति प्रयोगः। श्रा
द्धं ते भूतनाम्ना पिंडदानं। अमुक भूत एतत्ते पिंडः। माषान्नजलसंयुक्तघटदानं। तमेव कुल
नतोद्देशेन ही रिएपाघाउद्धूलचितानसाधनं। गार्हपत्याहवनीयदक्षिणाग्निकुसकल्पकल्प
स्काएकरणं। तत्र गार्हपत्यादीनां स्थापनं। सभ्यावसथ्ययोश्चितिसंनिधौ ततः समस्तमन्त्रमेषु स्व
पनं। ततो गार्हपत्याहवनीययोर्मध्ये काष्ठैश्चितिं संचिनुयात्। ततः प्रेतस्य केशश्मश्रुनखलो
म्नां छेदनं। कक्षादीनां निखननं। प्रागग्रीवमुत्तरलोमकृष्णाजिनं चितायामास्तीर्य तस्मिन्यज
मानं प्राक्शिरसमाधाप्ताति। ततः प्रेतस्य करे प्रेतनाम्ना पिंडदानं। अमुकप्रेत एतत्ते इति। मा
षान्नजलयुक्तघटदानं। ततः प्रेतस्याज्येनाभ्यंजनं। मुखे दक्षिणोत्तरनासिकाचक्षुःश्रोत्रेषु हि
रण्यशकलप्रासनं। कृतो चितेनयतात्प्राक् दक्षिणपश्चात्कल्पपात्रसमासाद्यातं। सूत्रेनुसारेणवांलपद
पंकृमीवसितः। चितिद्वयनात्सर्वेविकर्तव्यं। प्रेतस्य वृद्धिंकरेश्चसंवपनार्थं। हीलाम्प्रमंनिदधा
ति। सर्वाणि पात्राणि पात्रापगारगुप्तानि निवृत्यमाएाविधिना निदधाति। ग्रुकुंघतेन सरपिताद्रि

एष०
३१

एा हस्ते प्रस्तारयति। सव्ये पाणौ रिक्तमुपमृतं। हृदये ध्रुवां। रिक्तां दक्षिणनासिकायां। वेस्कं वामे स्क
चां। स्कन्धयोः प्राशित्रहरणे। शिरसि रिक्तां प्रणीताप्रणयनं चमसं। कपालानि वा शिरसि। अप्स
वामहस्ते पः कपालानां पार्श्वयोः। अर्थोः दक्षिणपार्श्वे रोहिकं। उत्तरपार्श्वे प्रतिप्रस्थानुमन्त्रकः।
अकृतवरुणस्नेसेष्टिकमेव द्विधा कृत्वा पार्श्वयोः केयांकं खंडमासाद्ययेत्। उदरे प्रषदाज्यव
ती इडापात्री। शिश्ने समापे रोम्पाः। अण्डयोः समीपे अरणी। तत्समीपे अधोमुखमुलूखलं
मुसलं च। उपवेषाः श्रीरतावदानपुरोडाशपात्री शूर्पपार्श्वं स्रुवं तत्कूर्चप्रमुखानि सर्वाणि पा
त्राणि कुर्वे प्रिद्ध्येसा इत्येत। पात्राण्यप्रणीतसहितानि वारणमघादिका। निचतत्रैवा
सादयेत्। अमुमयाश्ममयानां मत्स्यप्रक्षेपः। लोहमयानां च ब्राह्मणेरपदानमप्सुप्रक्षेपो वा
। तेताश्भिश्चितेएदीपनं। तत्रैवं अग्निना एभ्यविनिपर्यन्तं प्रत्येएात्रादनं कृत्वा ततस्तान्प्रदी
पयेत्। आवाहनीयगार्हपत्यदक्षिणाग्नयस्तुल्यकालं चितेएदीपनं यथाभ तितत्स्यादि
धेमं। पुत्रो वा भ्राता वा अन्यो वा ब्राह्मण आहुतीर्जुहुयात्। भ्रातपुत्रो गार्हपत्ये आज्यसंस्का
रः। अग्निहोत्रहवण्यां सकृद्गृहीत्वा ग्रहणं। आहवनीये समित्प्रक्षेपः। अस्मात्त्वमधिजातो

३२

सिलदर्भं तत्रा पतितां पुनः। असौ स्वर्गाय लोकाय स्वाहेत्यनेन मंत्रेण होमः। इति मध्यमेन मममेतिस्याः
। असौ स्थाने प्रेतस्य प्रथमांतनामग्रहणं। अस्य मंत्रस्य सद्विप्यामन्नूहः। ततोऽग्निहोत्रहवणीं
मुखेऽप्राग्रामासाद्यैतामाद्विरंकवंस्य मनाप्तिकायां। सव्यं दक्षिणहस्तो आज्यस्थाल्यां जर्वति
ऐग्निहोत्र्याः पात्रत्वा विशेषात्। अन्यमपीचेरप्युपासनं॥ ॥ अथ प्रसंगाद्दावघस्य संबंधिपात्र
प्रतिपत्तिरुच्यते॥ ॥ आहिताग्निर्यथास्यात्पंदग्ध्यव्यस्त्रिभिरग्निभिः। अनाहिताग्निरेकेन
लौकिकेनेतरैर्जनाः। अथ पुत्रदिरण्यस्तु मकुर्याद्दाहूचपंबद्धा अथ देशी शुचौ पुत्रे पश्चात्त्रि
ग्नादिलक्षणं। तत्रोत्तानं निधायैनं दक्षिणाशिरसं मुखे। तस्य हि एषा विधिप्रसीताचमसं
नस्या। अर्पितमार्थ्यियोरेकं चेद्विधा तत पूर्ववत्स्थापिता। स्रुवणाकमिसंबंधिद्वितीयपिंडपिद्विष्यां
यां दुष्यो रणीनहूत्वेदहणीपात्र त्रमाहितः। प्राशानिचांतन रणीहस्तन्यपाघं भासिद्धिपेत। अ
त्याधे स्त्रजातवक्षो दृषद्दक्षिणतः शातेः। सर्वविज्ञ कृपाद [illegible] दक्षिणपा
स्थवंदधान सिद्धं दक्षिणे करे पात्र प्रक्षे। स मिधिध्यातती वक्षि शेषं स्पादाहितमग्नि वृता॥ उखा
धि श्रवणशिष्र पूर्वानि नरे पात्र प्रक्षेपां तं समाहिता। अन्येवक्के वल्लो पासनि नाश्चितो मन्तं दक्षिणाशि

एघ० ३२

एवं निर्दध्यात्प्राक् शिरसो मितिशेषः॥ इमावस्थ्यस्य संबंधानां प्रतिपत्तिः॥ अथ प्रकृतिकाम
र्णोविशेषः। प्रकृतिकार्पोमता पांकुंभे उदकं कृत्वा तत्र पंचगव्यं प्रक्षिप्य आपो हिष्ठा इत्या
पस्या दिपुणपाभिरभिमंत्र्य ब्राह्मणान्नुक्तपार्पंचदश मजापत्यान्कृत्वा तेन कुंभीदकेन स्नात
कृत्वस्तं स्नापयित्वा पश्चात्तरेण सर्वविधिः पित्रादाहः कार्यः॥ जलवल्लामणे प्येवं॥ उदकान्
तकी व्याप्त रातीनस्येष एव विधिः। किंविमारी शेषणी पांनत्रि शीघ्र [illegible] धर्मर तव चना
त्॥ अथ स्मार्तमुदकर्मोच्यते॥ नद्यामुदकसमीपामनं॥ समीपस्थितं यो निर्संबंधि शा
लकं वा उदकं कएष्णा मह इति मंत्रेण दकुंपावेपेस पिंडाद्यः। पादिशातवर्षाद्वर्वाक् प्रेतो
भवेत तत्रह्याकरूप मिति वचनमितिमुक्तेः समस्तपुरुषसंबंधिनः सापिंडाः दशपुरुषसंबंधिनः
समानोदका श्चैकस्या मनिवास्येपावत्स्रग्रंजलं प्रविशंमेकवस्त्राः। अशिखाः प्राचीनावी
तिनः संतः। ततः सव्यपाणे रनामिकयांगुल्याजलमपनः शोशुचदघमित्येतावता मंत्रे
णापनोद्य दक्षिणामुखास्तस्मीन्निमज्जंति॥ कर्कादिभाष्यकाराणां मते अपनोदनेमंत्रा
दैवपाक्षिकादिमते निमज्जती॥ ततः प्रेतमुद्दिश्यैकेकं जलिंहाकृत भूमौ प्रक्षिपंति। अ

मुकगोत्रामुकशर्मन्प्रेतएतत्तेउदकमित्यनेनमंत्रेण॥ ततउदकं दत्वा र्मप्रवीदेशीशाद्वलवसुप
विष्टः सपिनन्मेसुहृद इतिहासपुराणादिकथाभिः शंस्याः रक्षानिस्तांदर्शयंतोवदेयुः॥ शा
द्वलं हरिततृणमस्तियस्मिन्निति शाद्वलवान्तस्मिन्शाद्वलवनि सममावुपविष्टा नितस्पॆः
रोदनंनकर्तव्यं॥ तदुक्तं॥ श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोवशः॥ अतोनरोदितव्यंहिक्रि
याःकार्याःस्वशक्तितइति॥ ततःपश्चाद्नवलोकयंतःपंक्तिभवस्थानेनकनिष्ठानन्त
तःकृत्वास्नानमायाद्यंति॥ गृहद्वारसमीपेआगत्यसर्वेत्रीणित्रीणिनिंबपत्राणिदंतैरख
ण्डयाआचम्योदकमग्निंगोरसर्षपांस्तोरूपिस्पेतानिप्रत्येकंस्पृष्ट्वापादेनपाषाणमाक्रम्य
गृहंप्रविशंति॥ ततःप्रभृतिब्रह्मचारिणोऽधःशयिनोनकिंचनकर्मकुर्वंति॥ नकापयेति॥ क्री
त्वालब्ध्वावादिवाश्रीपुःश्चमांसंपिंडंदत्वाततोभोजनं॥ भोजनकालेभोज्यात्सर्वाद्नक्रमुष्टिं
वप्रेतोद्देशेनभूमौनिक्षिपेत्। अमुकस्यगोत्रामुकप्रेतयक्रमुष्टिरुपतिष्ठतामिति॥ घुत्वादि
दशाहंप्रत्यहमेकैकमन्नपवनरेकंपिंडंप्रेतायदद्यात्। तत्रविधिः॥ स्नानंकृत्वाऽहतेवा
ससीपरिधायपिंडपितृपत्रवत्तूष्णींपिंडदानं। तूष्णींप्राणायामः। आचमनंदेशकालौस्मृ

त्वाऽमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंक्षुत्तृषानिवृत्त्यर्थंशिरोनिर्वापणार्थंपिंडदानकुंभ
भोजनदानमुदकदानंचाहंकरिष्यइतिप्रयोगः॥ अवनेजनं। अमुकगोत्रामुकप्रेतावनेनिक्ष्व
तिदर्भास्तरणं॥ पिंडदानं। अमुकगोत्रामुकप्रेतैषतेशिरःपूरकपिंडोमयादत्तइति॥ पूर्व
वत्पुनरवनेजनं॥ अनुलेपनपुष्पधूपदीपशीतलतोयकुंभऊर्णातंतुदानंपिंडेस्थापनमे
कमपिकुर्यात्। ततःपिंडसमीपे॥ इदंभूमौएकांजलितोयदानं। अमुकगोत्रामुकप्रेत
एषतेतोयांजलिरुपतिष्ठतां॥ इदंतोयपात्रंते५० अमुकस्यगोत्रामुकप्रेतस्यानेनप्रेतत्व
निवृत्तिरस्तु॥ क्षुत्तृषानिवृत्तिःशिरोनिर्वापणंचास्तु। पिंडमुदकेप्रक्षिपेत्॥ स्नात्वानवश्राद्धंकु
र्यात्॥ ततस्तूष्णींपूर्ववत्कर्मप्रयुज्य विप्राः॥ तूष्णींनिमंत्रणादिपादप्रक्षालनं॥ आचमनं॥
उपवेशनं॥ तूष्णींप्राणायामः॥ द्वाराचमनंदेशकालौस्मृत्वाऽमुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थमे
कोद्दिष्टविधिनाप्रथमदिवसनिमित्तंनवश्राद्धमहंकरिष्ये॥ उपहारप्रेक्षणं॥ तिलदर्भविकिरणं
। आच०। आमान्नसंकल्पः इदमामान्नंतेउपतिष्ठतु॥ तिलविकिरणं॥ इत्यामान्नदर्भास्तर
णं॥ अमुकगोत्रामुकप्रेतैषतेपिंडइतिपिंडद्वयंदद्यात्॥ अवनेजनप्रमवनेजनेनक्षः।

३४

प्रत्येकं गोत्रोच्चारणादि। स्नानदानं पिंडोद्धरणं। कृतस्नानवस्त्राद्धविधिर्यन्नान्नं पचेत्। तिलैःकृतं सर्वपि
ण्डादि। पिंडयोः हृदके प्रक्षेपः। एतदेव पदार्थान्तरं भवंति नाम्ने। पूर्वं नवश्राद्धं वा पश्चात् पिंडदा
नं।। गात्रे तैलकल्केशमीदकानां प्रेतोद्देशेन प्रक्षेपः। अमुकगोत्रामुकप्रेतात्र जलेन स्ना
हीमाहि।। अथ पारिमिल्लहो एतत्रैसमनो भवति तस्मिन् एकत्रैकस्मिन्नपि पात्रे उदकं
द्वितीये त्वीरं च कृत्वा पश्चाद्दिक्मवलंबाकान्तोधारा धयेत्।। अमुकप्रेतात्र तृप्यतादिति पिबेद
पितिमंत्रेण।। इतिप्रथमदिनकर्म।। अथ द्वितीयदिने प्रेतस्य कर्णौ ह्रीनासिका निष्प
मर्थं पिंडदानं।। कुंभगोजलदानं।। ह्रौ अंजलीद्वे तोयपात्रे।। त्रयपउदकांजलयएकवादे
पात्रपात्रे।। इतिद्वितीयदिनकर्म।। तृतीयेग्यालं समुन्नजवक्त्रं हि निष्पत्यर्थे पिंडदानं।।
त्रयोंजलयः त्रीणितोयपात्राणि।। अथ वा पंचोदकांजलयएव।। प्रथमदिवसवन्नवश्राद्धं।।
इतितृतीयदिनकर्म।। अथ चतुर्थेहनि संचयननिमित्तमेकोद्दिष्टश्राद्धं।। तत्र प्रथमदिनवत्
।। अत्रैकएकपिंडः।। स्मशानवासदेवतानां बलिहरणं। पुष्पधूपदीपनैवेद्यानि संभवमां उक्त
मादमुखेभ्यो देवेभ्यो नमः इतिमंत्रेण पाद्यादिना पूजां कुर्यात्।। ततः क्रव्यादमुखेभ्यो देवेभ्यो बलि

एम०
३४

दानं।। तत्रमंत्रः। देवा ये स्मिन् स्मशाने स्पर्शत्यं ततः सनातनाः। ते स्मात्स्वकाशाद् घृतं बलिम
द्य।।महत्पं। प्रेतस्यास्य शुभांल्लोकान् प्रयच्छंतु पिशाचभूतान्।। अस्माकमायुरारोग्यं सुखं च दत्त सु
खिमिति। एवं बलिं दत्वा विसर्जयेत्।। पलाशदंडेनास्थीनि प्राणानिकृत्वा अंगुष्ठकनिष्ठिका
भ्यामादाय पलाशपुटके प्रासनात् तत्र शम्याशेवालकर्दमानां बत्रासनं। तस्मीं च तेनाक्ता न्स्पृ
ष्ट्वा भित्वं स्नाप्य गुरुकर्पूरकेसरकस्तूरिकादिमिश्रणं दक्षिणप्रक्षिपितां कर्णे चंदनं। तत्रकुशा
स्तरणं। हरिद्रालापितवस्त्रखंडमास्तरण तस्मिन् वस्त्रे वा निवपामीत्यनेन मंत्रेण। अस्थिमहोपर।।
उँ आत्मानमनसानात्रैनब्रह्मणा त्रयप्याविद्यापारार्थिप्या महिकायाममपांरसेनानिवपाम्यसा
वितिमंत्रेण वा।। मितौ स्थानेप्रेतनामादेश्यः। पित्रमेधं विकीर्यतः। कुंभेष्व स्थिसंचयनं कर्तव्यं
अस्थिमहोकुशास्तरणं।। हरिद्रालापितवस्त्रास्तरणं। कुंभेएवकर्तव्यं। अस्थिसंस्कारात् ऊ
र्ध्वं भूप्रदेशे कुंभनिधानं तत्समं।। कुंभमध्येस्थिप्रक्षेपे मंत्रोभवत्येव।। इत्यस्थिसंचयनं।। दि
ना भूमिमपि नविलिप्यत तत्र तेनैव प्रकारेण बलिमंत्रेण बलिं दद्यात्। ततश्चतुर्थदिवसं वंधि
पिंडदानं। नाभिलिंगगुदनिष्पत्त्यर्थं। कुंभभोजनदानं। तलांजलपश्चलात्। पतात्रि जलपात्र

३५

णि॥ अथवा सप्तांजलय एव॥ इति चतुर्थदिनकृत्यं॥ पंचमेह्नि जानुजंघापादनिष्पत्त्यर्थं पिंडदानं
कुंभो जलपूरितः। पंचजलांजलयः पंचपात्राणि। नवांजलय एव वा। ततो नवश्राद्धं प्रथमदिन
वत्॥ इति पंचमदिनकृत्यं॥ षष्ठे सर्वमर्मनिष्पत्त्यर्थं पिंडदानं॥ कुंभदानं॥ षड्जलांजलयः षट्तो
यपात्राणि॥ अथ एकादशजलय एव वा॥ इति षष्ठदिनकृत्यं॥ सप्तमे नाडिकानिष्पत्त्यर्थं पिं
डदानं॥ कुंभभोजनदानं। सप्तांजलयः सप्तपात्राणि। त्रयोदशांजलय एव वा। अथ प्रथमदिनवन्न
वश्राद्धं॥ ॥इति सप्तदिनकृत्यं॥ ॥अष्टमे लोमदंतनिष्पत्त्यर्थं पिंडदानं। कुंभभोजनदानं। अ
ष्टांजलयः॥ अष्टौ पात्राणि॥ पंचदशांजलय एव वा ॥ इत्यष्टमदिनकृत्यं॥ ॥श्रीकृष्णायनमः॥
॥नवमे वीर्यनिष्पत्त्यर्थं पिंडदानं। कुंभभोजनदानं॥ नवजलयो नवपात्राणि। ततो नवश्राद्धं प्र
थमदिनवत्॥ ॥इति नवमदिनकृत्यं॥ ॥दशमे क्षुत्प्रणाशार्थं पिंडदानं॥ कुंभभोजनदा
नं। दशांजलयो दशपात्राणि। एकोनविंशति जलांजलय एव वा। अथ वा दशाहमध्ये प्रत्य
हं दशदशांजलय एव देयाः। न पात्राणि। आद्यपिंडं तु पदानं एकं तस्य शिरः। द्वितीयं प्रेताय॰
तृतीयं समाप॰ तत्र देशकालौ संकीर्त्य अमुक प्रेत तव प्रेतत्वनिवृत्त्यर्थं पिंडदानमहं करिष्ये इति तस्य शिरः। एष॰

३५

अवनेनिक्ष्व। गोत्र प्रेत अवनेनिक्ष्वापस्त्र अवनेनिज्य दर्भास्तरणं। अवनेजनक्रमेण पिंडदानं प्रत्यवने
जनं च पिंडानामुदके प्रक्षेपः। ततः स्नात्वा कर्तृ निवृत्त्यर्थं सर्वे केशश्मश्रुवपनं कार्यं पुः नखलोम
निकृंतनं च। ततः सर्वेषां सचैलस्नानं॥ ॥इति दशाहकर्म संपूर्णं समाप्तं॥ ॥दशाहमध्ये दर्शपा
ते दर्शदिन एव सर्वं दशाहिकं कर्म समापनीयं। त्रिरात्रादर्वाग्गि जिके चेत्। पित्रोस्तु प्रत्यहं दशा
हं दशाहे दद्यादिति मदनपारिजातकारः। अन्येषां तु मातापितृव्यतिरिक्तानां प्रथमदिनप्रभृति दर्श
पाते सर्वं समापनीयमेव। एतच्च प्रेतनिर्हरणादिकं पातिरिक्तानां प्रथममेव पाराणमात्रप्रमीणां कुर्या
त्। तथा च स्मृतिः। अपाराणमात्रप्रमीणां च कुर्याद्दाहादिकं क्रियाः। पतेकिंचिन्न कर्तव्यं न वा न्ये
षां करोति इति। तथा। एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रियां। न कुर्यात्पार्वणादन्यब्रह्मणीभू
ताय भिक्षवे। अहन्येकादशे प्राप्ते पार्वणं तु विधीयत इति। ब्रह्मचारिणां चर्यापाध्यायमातापितृव्य
तिरिक्तानां निर्हरणादिकं न कुर्यात्। यथाह याज्ञवल्क्यः। आ दिशीनोदकं कुर्यादाव्रतस्य समाप
नात्। समाप्तो मे तदकं दत्त्वा त्रिरात्रमशुचिर्भवेदिति। आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्र
ती चतीः सकरान्नं न चाश्नीयान्न चतैः सह संवसेदिति। परिमोहानिकृत्वेन ब्रह्मचर्यव्रतात्मवते

।पुनरुत्पन्नपतेनष्ठुध्यातीति। सपिंडीकरणांतानिश्राद्धानिलौकिकाग्निनाकार्याणितदूर्ध्वं। सपिं
डीकरणांतानिप्रेतश्राद्धानिपात्रनिवौतानिस्युर्लौकिकेवह्नावित्याहचाश्वलायनः॥ ॥अथै
कादशाहविधिः॥ ॥तत्रसाग्नेर्दाहदिनारभ्यैकादशाहे। निरग्निकस्यमरणादिनादारभ्यैकादशा
हेविधिवत्स्नात्वाषोडशाभिरुपचारैः पूजनंपूर्वकंविष्णुतर्पणंकुर्यात्। तत्रप्रमंत्रकप्राणाया
मत्रयंविधायदेशकालौसंकीर्त्यामुकगोत्रामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंश्रीविष्णोःषोडशाभि
रुपचारैःपूजनपूर्वकंतर्पणमहंकरिष्ये। ततःषड्वैषधितुलस्याद्यभिश्रमंजलिंकृत्वादक्षि
णाभिमुखोपसव्योपवीती। तीक्ष्णजुद्ध्वैर्द्वितीर्थेनहस्तेनैवतर्पणंकुर्यात्। नशंखेन। सहस्रशी
र्षापुरुषः। अनादिनिधनोदेवःशंखचक्रगदाधरः। अक्षय्यःपुंडरीकाक्षःप्रेतमोक्षप्रदोभवाप्या
पहाविष्णुस्तृप्यतु। गोविंदस्तृप्यतु। नारायणस्तृ०। पुरुषएवेदमित्यस्याऋष्यादयःसंतिदेवाद्
संतप्रभावमेवतर्पणं। युंजतेमनः। इदंविष्णुः। इरावती। देवश्रुतौदेवेषु। विष्णोर्नुकं। दिवो
वामतत। विष्णोरराटं। इमायै। आदित्यै। त्रिर्विविष्णुः। अग्नेरुत्तमः। त्वोहरणं। एत्वोहरणोवो। अतमत्सं
।विष्णोःकर्माणि। तद्विष्णोः। वाचस्पतये। उपयामगृहीतोसि। विष्णोःक्रमोसि। तद्विप्रासः॥

त्रीणिपदा। अनेनविष्णुतर्पणेनप्रेतस्यप्रेशांकालौश्रीतिरस्तु॥ ॥इतिपुराणोक्तंविष्णुतर्पणं॥ ॥
अथवृषोत्सर्गः॥ ॥तत्रदेशकालौस्मृत्वाप्रेतस्यप्रेतत्वनिवृत्त्यर्थंएकादशाहप्रयुक्तद्वादिकात्योपतात्रा
स्यर्थंचवृषोत्सर्गंकरिष्ये इतिसंकल्पः। ततोवस्त्रचंदनतांबूलादिनाहोतृब्रह्माणौवृत्वापात्रेकर्क
मनेनुब्रह्मवरणमात्रं। होमस्यसकर्तृकत्वात्। अस्माकंतुपुराणोक्तत्वात्तुमयोर्वरणमत्रात्ततःस्व
यंपंचभूसंस्कारान्कृत्वावत्सप्राग्निस्थापनं। रुद्रकलशस्थापनं। ततोअश्वत्थानांबूलस्थानांस्थापन
प्रतिष्ठा। इमेकलशाःसुप्रतिष्ठिताभवंतु। होतृब्रह्मणोर्नानामासनदानं। ब्रह्मोपवेशनं। प्रणी
तापात्रमध्येपिष्टादिनाप्रधानंकृत्वामूलदेशेदर्भेणिरजलंप्रक्षिप्यप्रणयनं। अग्नेरुत्तरतोनिधा
नं। परिस्तरणं। अग्नेरुत्तरतःपश्चाद्वापात्रासादनं। तद्यथापवित्रच्छेदनानि। पवित्रेद्वेप्रोक्षणीपा
त्रं। आज्यस्थाली। संमार्गकुशाः। उपयमनकुशाः। समिधस्तिस्रः। स्रुवः। आज्यं। तंडुलाः। पौमश्च
रुः पिष्टमयः। तस्यचश्रपणनुपदेशात्सिद्धःएवोपादीयते। होतुर्वस्त्रयुगं। सुवर्णकांस्यादिदक्षि
णाः। ब्रह्मणःपूर्णपात्रदानं। वर्णेवादक्षिणा। इतिपात्रासादनं। चरूस्थालीमिन्नुणाम्पोरूपक
दैनोपवित्रकरणं। प्रोक्षणीसंस्कारः। पश्चात्पात्रानांप्रोक्षणं। अहतंचदेप्रोक्षणीनांनिधा

३१

नाज्यस्य निर्वापः। चरुस्थाल्यां प्रणीताप्रणयनं सिंच्य तन्दुलावापः। ब्रह्मणा आज्यस्याधिश्रपणं। स्वय
मेव चरोरधिश्रपणं। उभयोः पर्यग्निकरणं। स्रुवस्य प्रतपनं सम्मार्ज्य पुनः प्रतपनं प्रणीतोदके
नाभ्युक्ष्य निधानं। आज्योद्वासनं। उत्पूयावेक्षणं। प्रोक्षण्युत्पवनं। उपयमनकुशादानं। समिधो
भ्याधानं। प्रोक्षण्युदकेन पर्युक्षणं। तत इह रतिरिति षडाहुतीर्जुहुयात्। इह रतिः स्वाहा।
इह धृतिः स्वाहा। इह स्वधृतिः स्वाहा। एतेषां इदं पशुभ्य इति त्यागः। इहरन्तिः पशुदेवत्यमिति
सर्वानुक्रमण्यामुक्तत्वात्। ॐ उपसृजं धरुणं मात्रे० धयन् स्वाहा। इदमग्नये। उपसृष्टो मम
सा। सुवीरः स्वाहा। इदमग्नये। तत आघारावाज्यभागौ। ॐ प्रजापतये स्वाहा। इन्द्राय स्वाहा
। अग्नये स्वा० सोमाय० ततः पायसचरुहोमः। अग्नये स्वाहा। रुद्राय० शर्वाय० पशुपतये०
उग्राय० अशनये० भवाय० महादेवाय० ईशानाय०। ततः पिष्टचरुहोमः। पूषा गा अ
न्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजं सनोतु नः। स्वाहेत्येतया ऋचा हुतिः। इदं पूष्णे। ततः पाय
सपिष्टचरुभ्यां अग्नये स्विष्टकृते स्वाहा। ततो भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। त्वं नो अग्ने
स त्वं नो अग्ने। अयाश्चाग्ने। ये ते शतं। उदुत्तमं। प्रजापतये। संस्रवप्राशनं। मार्जनं पवित्रप्रतिपत्तिः। पम०

३१

प्रणीताविमोकः। ब्रह्मणे दक्षिणादानं। ततोऽभ्यर्च्य पत्रपुष्पकलशोदकमालाद्यैर्गन्धमाल्या
दिभिः संपूज्य हस्तेन कलशं स्पृशन् रुद्राध्यायं जपेत्। ततः पुरुषसूक्तं कूष्माण्डीः पदं देवा दे
वहेडनमिति तिसृऋचः। षडंगं रुद्रजपो वा। पारूडपुराणवचनात्। ततो वृषवत्सतरीणां स्ना
पनं। अलंकरणं। चक्रत्रिशूलकरणं। अंकनं। वृषस्य कर्णे जपः। वृषो हि भगवान् धर्म
श्चतुष्पादः प्रकीर्तितः। वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः। ततो गृहीतपुष्पांजलिर्वृषं
त्रिः प्रदक्षिणीकृत्य नमस्कुर्यात्। ततो वृषवत्सतरीणां वस्त्रसंश्लेषः। अयं हि वो मया दत्तः
सर्वासां पतिरुत्तमः। तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः। ततश्चतुःकृत्वोऽग्निं प्रदक्षि
णीकृत्य वत्सतरीणां अग्निप्रदक्षिणं चत्वारः का पितापुच्छे पुरुषसूक्तेन प्रेतस्यावर्तय
णं कार्यं। ततऽन्यार्थाः। मंधेमा दिग्देशकालौ संकीर्त्य एनं वृषं रुद्रदैवतं पंचाशक्लालेभूतं गां
धापर्चितं एवं विधा वत्सतरीः सहितं अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वमुक्तये हमुत्सृजा
मि। एतं युवानं पतिं वो ददामि [illegible] या मदेमे तिसृभिर्मेनपाणिनाऽवृषपुच्छेनोदकं गृहीत्वा दक्षिणे
न सतिलाः सकुशाः अपः आदाय अमुकगोत्रायामुकप्रेताय एष वृषमयादत्तस्तं तारय पितॄंश्च

३८

वैश्वदेवपुष्पार्पणहिरण्यपंचरत्नतिलमुद्रकंभूमौ निक्षिपेत्। ततो वत्सतरीमध्याद्धि तत्सन्न्यासमर्पयेद्भू
मिमात्रा हित्वा हेमादि स्वर्णस्पर्शः स्वाहेत्यंतेन शुक्लश्लोकेनाभिमंत्रणं। ततो दक्षिणास्कंधेन
उपवीतेनैकं पथे द्वे पूर्वं पर्यस्ते ति। ततः शत्रुनुसारेणायामसमे नव्राह्मणानां भोजनं दक्षिणा
सरुद्रकुंभस्य स्पर्धे नोपवीतं त्रेप्रदानं॥ ॥छ॥ इति शर्योत्सर्गः॥ ॥ततस्तंत्रेण वत्सा श्राद्धानि
॥ आद्यं नवश्राद्धं प्रथमदिनवत्। तदुक्तं मरणस्थानेऽस्मिन्नो वा प्रथमेऽह्नि ततीये वा पंचमे सप्त
मे पि वा। नवमे काद्यदशे चैव नवश्राद्धानि कारयेत्। इति पूर्वं दिवा साद्य एप्य न कृतं चेद्दैकादशेऽह्नि
कुर्यात्। नवश्राद्धानाम्य्समासिकानामाद्यं स्वतंत्रैकोद्दिष्टमेवेति। तत्र स्वतंत्रैकोद्दिष्टे क्रि
यमाणे देशकालौ मासंत्रेणानुष्ठानसिद्ध्यर्थं यथानुष्ठानपद्धत्यादौ स्वतंत्रेणैकोद्दिष्टं
ततो नवश्राद्धं तोमासिक मिति स्मर्तव्यं स्यात्। तत्रैकादशाहे आद्यमासिकश्राद्धे एका
दशब्राह्मणानामामंत्रणं। पूर्वं घुः स्नात्वा विप्रेषु प्रेतनिवेदनं। ततो सिद्धिं लोकं तं कृता
त्वद्धि हिता त्पथः। मनसा वा मुभू तेन वि प्रेत्वाहं निमोजयेत्। प्रतज्ञ विष्णु प्रसादेन एकं विप्रेनि
वेशयेत्। अस्मिन्निते विप्रमि वेशनं। पाद्यं दत्वा नमस्कृत्य तैलेन पादौ प्रक्षालयेत्। उद्दिते विप्र

ए०म०
३८

सप्रस्तकनाखकेशंकारयित्वा स्नात्वाभ्यंजनं चद्द्यात्। ततो भूमिपरिग्रहणं महत्सच्छत्रसं
करणं। नद्यादौ सचैलस्नानं। तीर्थानि मनसा ध्यात्वा आत्मनो भस्मक्षालणं। एवं शुद्धिं कृत्वा ब्राह्म
णानामावाहनं। आगतं दृष्ट्वा स्वागतकरणं। अर्घपाद्यकरणं। आसनोपकल्पनं। आसनेनु
पवेशनं। छत्रोपानहदानं। तिलोपचारकरणं। नामगोत्रमुच्चार्य हस्ते तापनदानं तद्दत्वा पा
वाहयेद्भूमिर्दं भहस्तोयभूतलं। तत्र मंत्रः। इहलोकं पापं मिक्षापानोमि परमां गतिं। एवमाच्छा
दितं धूपपुष्पधूपैः समर्चयेत्। ततो वस्त्राभरणदानं। पक्वान्नदानं। अपापदार्थवर्जितं स
कलं श्राद्धं। तासां हिरण्यपदस्थपात्रं नरक्षत्रोदकुंभमन्नं गुणवते ब्राह्मणाय दानं। ततः स्नानं।
ततएकादशाभिनोसरीः रुद्रश्राद्धं। ततः स्नानं। विष्णुपूजनं। प्रेतोद्देशेन तत्पीठस्थकुंभदानं।
भाजनानि सतिलानि तत्पीठस्थदानं। मुद्रिकावस्त्रयुग्मछत्रोपानहदानं। अश्वरथ्याजमहि
षीशय्यादानं। गोभूमितिलहिरण्यादिदानं। तांबूलपुष्पादानं। एकादशाहादारभ्य द्वादशाहं पाव
त्यान्नघटदानं। देवालये पाषाणोवानुपदानदानं। ऋणधेनुदानं। ततो वैष्णवदेवः॥ ॥इति
क्रियापद्धतिः॥ ॥इति नवकं द्विकादाद्यमासिकैकोद्दिष्टप्रकरणं॥ ॥सपिंडीकरणमाह॥

३९

॥ ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत तदा चत्वारि पात्राणि सतिलगंधोद
कानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य ॥ संवत्सरे पूर्णे सपिंडीकरणं कार्यं । अथवा
त्रिपक्षे द्वादशाहे वा वृद्धिप्राप्तौ वा कुर्यात् । इति चत्वारः पक्षाः दर्शिताः । तत्रेयं व्यवस्था । द्वा
दशाहे पितुः सपिंडीकरणमग्निमता कार्यं । सपिंडीकरणं विना पिंडपितृयज्ञस्यासिद्धेः ।
साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान्भवेत् । द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति
वचनात् । निरग्निकस्तु त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वा कुर्यात् । पक्षप्राप्तं वत्सरे सपिंडीकरणं तदा
षोडशश्राद्धानि कृत्वा सपिंडीकरणं कार्यम् । उत सपिंडीकरणं कृत्वा स्वकाले तानीति संशयः ।
उभयथा वचनदर्शनात् । श्राद्धानि षोडशादत्वा न तु कुर्यात्सपिंडनं । श्राद्धानि षोडशापाद्य
विदधीत सपिंडनमिति । षोडशश्राद्धानि च द्वादशाहे त्रिपक्षे वा यदा मासिकान्याब्दिकं श्रा
द्धानि षोडशैतानि संस्मृतानि मनीषिभिरिति दर्शितानि । तथा । यस्यापि वत्सरादर्वाक् सपिं
डीकरणं भवेत् । मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति । तत्र पिंडीकरणं कृत्वा स्वकाले
तानि कर्तव्यानीति प्रथमकल्पः । अप्रातिकालत्वेन माधान्यषिकाप्रत् । पक्षापि वक्तुं न षोडशश्रा

एम०
३९

द्धानि कृत्वैव सपिंडीकरणं संवत्सरान्ते मासिकानि कर्तव्यानीति सोयमपकर्षकल्पः । पक्षान्तरापकर्षकल्पेन प्रा
कृष्टैव सपिंडीकरणात्प्रेतश्राद्धानि करोति तदैकैकं द्विरविधाने न कुर्यात् । तत्पक्षानुमुख्यकल्पेन स्व
काल एव तानि करोति तदाब्दिकं योपकर्षात् करोति पार्वणमेकोद्दिष्टं वा तथा मासिकानि कुर्यात् । सपिंडी
करणादर्वाक् कर्तव्यश्राद्धानि षोडशैकोद्दिष्टविधानेन कुर्यात्सर्वाणि तान्यपि तु । सपिंडीकरणादू
र्ध्वं पित्रा कुर्यात्तदा पुनः । प्रत्यब्दं यो यदार्थो कुर्यात्तथा कुर्यात्सूतकान्तरापीति स्मरणात् । तावता पात्रा
णि पूरयित्वेति चतुर्ग्रहणात् त्रीणि प्रेतस्य पितृपितामहप्रपितामहस्य च नार्द्रनं नवषट्कारोपि
तच्चतुर्णां पात्राणां पितृणामेकं प्रेतस्य भवति ॥ ॥ प्रेतपात्रं पितृपात्रेष्वासिंचति ये समाना इ
ति द्वाभ्यां ॥ ॥ प्रेतसंबंधि पात्रं गृहीत्वा प्रेतस्य पितृपितामहप्रपितामहपात्रेषु ये समाना इति द्वा
भ्यां मंत्राभ्यामासिंचति । प्रत्यासेकं मंत्रौ भवतः । आसेकप्रकारोपि तत्र पुराणे । चतुरोर्घ्यार्थे पात्रेषु
एकं वामेन पाणिना । गृहीत्वा दक्षिणेनैव पाणिना सतिलोदकं । संसृजेत्तु तथा ये समा
ना इति स्मरन् । प्रेतमेतस्य हस्तेषु चतुर्ष्वगाजलांजलिं क्षिपेत् । ततः पितामहादिभ्यस्त्रिभ्यः पृथक् पृ
थगिति । वाजसनेयिभिस्तु पूर्वं पितृभ्यो देयं पश्चात्प्रेताय प्रदानम् ॥ ॥ एतेनैव पिंडो व्याख्यातः

५०

॥ पश्चात् प्रेतार्घपात्रस्थं जलं पितृपात्रे समानाइति द्वाभ्यां मंत्राभ्यां पात्रत्रये स्थापितं प्रेतपिंडमपि त्रेधा
कृत्वा पिंडत्रये निदध्यादिति मरीचिः। तत्प्रकारश्च ब्रह्मपुराणे। कृत्वा पिंडं मध्यभागं मध्यात्रान्मुभा
गं। सुवर्णरौप्यदर्भैस्तु कृत्वा शस्त्रं पिंडं तत्त्रिधा। कृत्वा पितामहादिभ्यः पितृभ्यः प्रेतमर्पयेत्।
तथा। सुवर्णतिलांस्तु तथास्तिः पिंडान्कृत्वा प्रपूजयेत्। अर्घैः पुष्पैस्तथा धूपैर्दीपैर्माल्यानुलेपनैरि
ति। एतच्च पितृश्राद्धसहितं सपिंडीकरणं सविभक्तधनेषु बहुषु भ्रातृषु सत्सु एकेनैव कृतेनालं
न सर्वैः कर्तव्यं। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपी
ति स्मरणात्॥ मातुः पिंडदानादौ गोत्रे विप्रतिपत्तिः। भर्तृगोत्रेण पितृगोत्रेण वा देयं। उभयथा
वचनदर्शनात्। मातुः सपिंडीकरणे विरुद्धानि वाक्यानि दर्शयंते। तत्र पितामह्यादिभिः सह स
पिंडीकरणं स्मृतमिति। तथा भर्त्रा पितामह्या च समात्रादिभिः सह सपिंडीकरणं कर्तव्यमिति
। पैठीनसिरह। अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडतां। श्वश्र्वादिभिः सहैवास्याः सपिंडीकर
णं भवेदिति। पत्न्याः सह सपिंडीकरणमप्याह। पिता वै केन कर्तव्यं सपिंडीकरणं स्त्रियाः। स्वामिना
पि हि तेनैकां मंत्राणि निर्दिशेदिति। उशना मातामहेन सह सपिंडीकरणमुक्तं। पितुः पितामहे

ए प० ५०

न सह सपिंडीकरणमुक्तं। पितुः पितामहे यद्वत्पूर्णे संवत्सरे सुतैः। मातुर्मातामहे तद्वदेषा सपिं
तामते ति। एवं विधेषु वचनेषु सत्सु पुत्रायां भार्यायां प्रमीतायां भर्त्रा स्वमात्रेव सा पिंडं कुर्या
त्। अन्यत्राचाराद्व्यवस्था। ॥ अत ऊर्ध्वं प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यात्॥ ॥ अतः सपिंडी
करणादूर्ध्वं प्रेतायान्नं दद्याद्यस्मिन्नहनि पंचत्वं प्रेतः स्याद्दिवसे तस्मिन् प्रेतायैतदेकव
चननिर्देशात्तथा पितृव्यतिरिक्ते नरे त्रिमोद्दिष्टं मासश्राद्धं वार्षिकाद्ये। यथाह परमेष्ठी। आद्ये द्विके
पितृकार्ये च वार्द्धौ। मासः प्रशस्यते। विवाहाद्यौ मलतः सौरो यज्ञादौ सावनः स्मृत इति॥ ॥ इति
नवकंडिकाया सार्थ आर्षे पंचमी कंडिका॥ ॥ अथ मपेणाः॥ ॥ द्वादशाहे विधिकर्म[illegible] विष्णुप्र
जनांत तो द्वादशाहे ऊनमासिकमेकोद्दिष्टं ततः स्नानं। प्रेतोद्देशेन मासानां सज्जलानां द्वादशाघ
टानां दानं। एका वर्द्धनीपक्कान्नजलपूरिता विप्रायदेया। एकोद्दिष्टधर्मेण जपधरीति मा॥ एक स्त्रियस्त्र
पयो॥ ॥ ततो मासिकानि चतुर्दश श्राद्धानि एकतंत्रेण। तत्र क्रमः द्वितीयमासे त्रिपक्षे ततः तृतीयमासे
चतुर्थमासे पंचममासे षष्ठे मासे षाण्मासिके सप्तमे अष्टमे नवमे दशमे एकादशे द्वादशे ऊनाब्दिके चेति प्र
तेकोद्दिष्टवत्कार्याणि। ततः स्नानं कुर्यात्। ततः सपिंडीकरणं। तत्र पूर्वं वैश्वदेवप्रारंभः कर्तव्यं।

४१

ततः पार्वणं प्रेतस्य पितृपितामहप्रपितामहानां। तदर्थं त्रपात्राण्यपाद्यसंज्ञालनं। तत्र सर्वं पार्वणव
त्। एकोद्दिष्टे एकोद्दिष्टवत्॥ अत्राद्यमासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्य वसुरुद्रा
दित्यलोकप्राप्त्यर्थं प्रेतत्वनिवृत्त्यर्थं अमुकगोत्राणां प्रेतस्य पितृपितामहप्रपितामहानाम
मुकशर्मणां वैश्वदेवपूर्वकं सैकोद्दिष्टं पार्वणविधिना सपिंडीकरणश्राद्धं पुष्पस्तलत्त्म्याहं क
रिष्ये। आसनं आवाहनं। विश्वेषां देवानां। पितॄणां प्रेतस्य च अर्घपात्राणि पूर्ववत् पितृभ्यश्चावि
श्वेभ्यो देवेभ्योऽर्घं दत्वा ततः प्रेतपात्रजलं प्रेतपात्रे जलचतुर्थभागेनार्घं दत्वावशिष्टमर्घपा
त्रस्थितं जलं पित्रादिपात्रेषु विभज्य मन्त्रोपांशुना पेत्। तत्र प्रेतपात्रं पितृपात्रेषु सं
योजयिष्य इति पृष्ट्वा संयोजय इत्यनुज्ञातोऽर्घं संयोजयेत्। एवं पिंडं योजनेष्वनुज्ञा मार्धं तां त
त्रे मौ ये समानाः इति मंत्रद्वयं पठित्वा ततः अमुकगोत्रस्यामुकप्रेतस्यार्घः। अमुकगोत्रस्य प्रेत
स्य पितुरमुकशर्मणो अर्घेण सह संयुज्यतां। वसुलोकप्राप्तिरस्त्विति च वदेत्। एवं पिंडदाने प्र
वेपार्वणसंबंधिनः पिंडाः स्युः पश्चात्प्रेतपिंडं त्रेधा विभज्य ततश्चाद्यं भागं मा ये समा
नाः इति मंत्रद्वयं पठित्वा। अमुकगोत्रस्यामुकप्रेतस्य पिंडं संयोजयामस्य मं पिंडं वर्तुलं कुर्यात्॥

एम०
४१

नेन्दुलोकप्राप्तिरस्त्विति वदेत्। एवमितराभ्यां पिंडाभ्यां संयोजनं। अनंतरं रुद्रलोकप्राप्ति
रस्तु। आदित्यलोकप्राप्तिरस्तु। इति यथाक्रमं वदेत्। अत ऊर्ध्वं अत्र पितर इति जपादि। एज
नानंतरं पिंडानभिमृश्य संवदेत्। एष वोनुगाः प्रेतः पितरस्तं दधामि वः। शिवमस्त्विति शेषाणां
जायतां चिरंजीवितं। समानी व आकूतीः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सु
सहासति। अत ऊर्ध्वं प्रेतशब्दो नोच्चार्यः। अन्नाद्यादिषु। आइं समाप्यस्मै तद्धर्तु संकल्प
ः॥ ॥ इति नवकंडिकागृह्यधर्मभाष्ये सपिंडीकरणमर्यादाः॥ ॥ वृद्धिश्राद्धमाह॥ ॥आभ्युद
यिके प्रदक्षिणमुपचारः॥ ॥पुत्रजन्मविवाहादौ अभ्युदये पश्चाद्धं तदाभ्युदयिकशब्देनोच्य
ते। तत्र प्रदक्षिणमुपचारः। प्रदक्षिणग्रहणेन यज्ञोपवीतिना प्राक्संस्थं। उदकसंस्थं वा प्रा
चीनावीतमपि निषिध्यते। शातातपः। अनिष्ट्वा पितृपत्नीन् वैदिकं किंचिदाचरेत्। तत्रापि
मातरः पूर्वं पूजनीयाः प्रयत्नतः। अकृत्वा मातृयागं तु वैदिकं यः समाचरेत्। तस्य क्रोधसमा
विष्टा हिंसामिच्छंति मातरः इति। मातृगणश्च भविष्यपुराणोक्तः। गौरी पद्मा शची मेधा
सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्म

इति तप्यास्यहे। विष्णुपुराणे। कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः। शुभकर्मणि बालानां चूडाक
र्मादिके तथा। सीमंतोन्नयने चैव पुत्रादिमुखदर्शने। नांदीमुखान् पितृगणान् तर्पयेत्प्रयतो
गृहीति। जापालिः पशुहोमे प्रतिष्ठासु नैवल्याबंधमोक्षयोः। पुत्रजन्मनि सोमे च सोमे शुद्धिश्राद्धं
समाचरेत्। मातृश्राद्धं तु पूर्वं स्यात् पितृणां तदनंतरं। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृ
तमिति। वैदिककर्मस्वप्रतिप्रयोगं श्राद्धा द्वादश विप्रसकावाहकामापनः। अपस्तत्क्रिया। निक
र्माणि कर्मकर्मकारिभिः प्रतिप्रयोगं। नैतास्वप्रमाणं। श्राद्धमेकमिति। तस्मिवैदिकक
र्मलोपस्थकादिषु नश्राद्धं कर्तव्यमिमाह कात्यायनः। नाष्टकासु भवेत् श्राद्धं न श्राद्धे श्राद्धमि
ष्यते। न सोष्यंतीजातकर्मणि प्रोषितागतकर्मसु॥ ॥ष्ट्वकारिः॥ ॥एतत् श्राद्धप्रभृति कर्मपूर्वाङ्के भ
वतीति नपराह्णे। पुत्रजन्मादौ तु तत्काल एव॥ ॥पित्र्यमंत्रवर्जं जपः॥ अपसव्यापसव्ययोर्जपस्य
प्रतिषिध्यते। न कात्यायनेन पुनर्दर्भपात्रादीत्येतं त्रयोदश श्राद्धे पित्र्यमिति पित्र्यमंत्रसंज्ञा नस्यैव
प्रवणात्॥ ऋजवो दर्भाः॥ ॥अनंत जवो दर्भा भवंतिन द्विगुणा॥ ॥यवैस्तिलार्थाः॥ ॥
अत्र तिलार्थाः सर्वे यवैः कार्याः तत्तन्मंत्रेपि यवोसीत्यूहः कार्यः॥ मुख्यत्वश्च्यामिथा पकत्वान्

॥ ॥संपन्नमिति तृप्तिप्रश्नः॥ ॥न स्वदितमिति पृच्छतीत्युक्तं तत्र प्राः स्वदितमस्य स्थाने संपन्नमि
त्ययं प्रश्नो भवति। तथा च छंदोगपरिशिष्टे। संपन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते। सुसं
पन्नमिति ते ब्रूयुः सुसंपन्नमिति प्रोक्तशेषमन्नं निवेदयेदिति॥ ॥दधिबदरक्षतमिश्राः पिं
डाः॥ ॥दध्यक्षतैः फलैरक्तैश्च मिश्राः पिंडा अत्र देयाः॥ ॥नांदीमुखाः पितरः वाचयिष्य इ
तिपृच्छति॥ ॥क पितृन्वाचयिष्ये इत्यस्य स्थाने नांदीमुखान्पितृन्वाचयिष्ये इत्ययं प्रश्नो भ
वति॥ ॥नांदीमुखाः पितरः प्रीयंतामित्यस्य स्थाने प्रयोगो भवतीति विशेषः॥ ॥नांदीमुखा
न्पितृन्वाचयिष्ये इति पृच्छति पितृन्वाचयिष्ये इत्यस्य स्थाने इत्यर्थः॥ ॥वाच्यतामित्यनुज्ञातो
नांदीमुखाः पितरः पितामहाः प्रपितामहाः मातामहाः प्रमातामहाः वृद्धप्रमातामहाश्च
प्रीयंतामिति। द्विजैर्वाच्यतामित्यनुज्ञातो नांदीमुखाः पितरः इत्यादि प्रीयंतामिति तत्पठेत्॥ ॥
न स्वधां प्रयुंजीत स्वधावाचनं न कुर्यादित्यर्थः॥ ॥युग्मानाशयेद्विप्रान्॥ अत्रापि कात्यायनः वृद्धि
के युग्मान् ब्राह्मणान् आशयेत्। भोजयेदित्यर्थः॥ इति नवकंडिकायां गदाधरभाष्ये वृद्धिकंडि
का॥ अथ प्रयोगः॥ ॥तत्र पूर्वेद्युः कर्तव्ये मुकनिमित्तं मातृपूजनपूर्वकं नांदी

४३

ह्मणपूर्वकं वनांदीश्राद्धमहं करिष्ये इति संकल्प्य ततः क्षालितैः शुक्लतंदुलैः पीठस्योपरि गौ
र्यादिषोडशमातॄः स्थापयेत्। तद्यथा ॐ भूर्भुवः स्वः गणपतिं स्थापयामि। ॐ गौरीं स्था
पयामि। पद्मां स्थापयामि। शचीं स्थापयामि। मेधां स्थापयामि। सावित्रीं स्थापया
मि। विजयां स्थापयामि। जयां स्थापयामि। देवसेनां स्थापयामि। स्वधां स्था० स्वाहां
स्था० मातॄः स्थापयामि। लोकमातॄः स्था० धृतिं० पुष्टिं० आत्मकुलदेवतां० ततः मा
तॄर्मनोजूतिरिति प्रतिष्ठापनं। ततः गणपतिसहितचतुर्दशमातृभ्यः गंधं समर्पयामि। धूपं०
दीपं। नैवेद्यं० तांबूलं० दक्षिणां च० गणपतिसहितानां चतुर्दशमातॄणां पूजनं विधि० पश्चात्
पद्धतिरिक्तं तस्मारिष्टमस्तु॥ ॥इति मातृपूजनं॥ ॥अथ वसोर्द्धारा दीवी भूतं गृहीत्वा कु
ड्यादिषु वसोः पवित्रमसीति धाराः पंच सप्त नव वा द्वादश संख्याः कुर्यात्। मनोजूतिरिति प्रतिष्ठा।
ततो वसोर्द्धारादेवताभ्यो नमः इति पंचोपचारैः संपूजयेत्॥ ॥इति वसोर्द्धाराकरणं॥ ॥अथ
नांदीश्राद्धं॥ ॥तत्र यथाकुलदेशाचारेण पिंडकमपिंडकं वा कार्यं। तदुक्तं भविष्यपुराणे
पिंडनिर्वपणं कुर्यान्न कुर्याद्वा द्विजोत्तमः। वृद्धिश्राद्धे कुलाचारो देशकालाद्यपेक्षया हि। अपिंडके

एम० ४३

नौकरणादीनामपि निषेधः। तथा हि। अग्नौकरणमर्घं चावाहनं चावनेजनं। पिंडश्राद्धे प्रकुर्वी
त पिंडहीने निवर्तते। पिंडनिर्वापरहितं यत्र श्राद्धं विधीयते। स्वधावाचनलोपोस्ति विकरस्तन्न
लुप्यते। अन्नप्रदक्षिणा स्वस्ति सौमनस्यं यथास्थिति। इति। अत्रापिंडकमाभ्युदयिकं लिख्यते।
आचमनं प्राणायामं। विश्वेदेवार्थे मात्राद्यर्थे पित्राद्यर्थे सपत्नीकमातामहाद्यर्थे च द्वौ द्वौ वि
प्रौ युग्माः शक्तितो भोज्याः। अमूलाग्रजवैर्दर्भैः यज्ञोपवीती प्राङ्मुखो दद्यात्। तिलार्थे प्र
वाः नांदीमुखाः सत्यवसुसंज्ञका विश्वेदेवाः एतद्वः पाद्यं पादावनेजनं पादप्रक्षालनं। एष अ
र्घः। इदमत्र चंदनं च पुष्पं। अमुकगोत्राः नांदीमुख्यो मातृपितामहीप्रपितामह्यः एतद्वः पा
द्यं पाद्यं पादावनेजनं। पादप्रक्षालनं एष अर्घः। इदमत्र चंदनं पुष्पं। अमुकसगोत्राः पितृपि
तामहप्रपितामहाः नांदीमुखाः युग्मरूपाः एतद्वः पाद्यं पादावनेजनं पादप्रक्षालनं एष
अर्घः इदमत्र चंदनं पुष्पं। अमुकसगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः नांदीमु
खाः युग्मरूपाः एतद्वः पाद्यमित्यादि। ततः आचमनं शिखाबंधनं। अग्निष्वात्ताः पितृगणाः प्रा
चीं रक्षंतु मे दिशं। तथा बर्हिषदः पांतु याम्यां ये पितरस्तथा॥ प्रतीमाज्यपास्तद्वदुदीचीमपि

श्रीमपः॥ ऊर्ध्वं तिष्ठंतु ये मा रक्षोकं पवाकनकोप्यधः॥ रक्षोभूतपिशाचेभ्यस्तेभ्यो वासुदेवः॥ सर्वत
श्चाधिपत्येषां पमोस्त्वां करीनुमे॥ तिला रक्षंतुमुरना र भीरक्षंतु राक्षसान्॥ पक्तिं वैश्रो॥ क्षिपो
रक्षेदतिथिः सर्वरक्षकः॥ निहन्मि सर्वं यदमेध्यवद्भिमा दिसर्वेद्दूर्मंतं॥ मतोनीवंधनं श्राद्धभू
मौ॥ पाभिलाएम्पा॥ पापेनमद्दतं पठेत्॥ ततः कमार्थजलाभिमंत्रणं पद्देवाद्दतिमंत्रेण त
तः पाकप्रोक्षणं॥ अपदस्था दिश्रद्दसंपर्कदोषाः पाकादीनां पावित्रता॥ स्तिति दिशा काल
पाकपात्रद्रव्यश्रद्धाः संपदस्तु॥ अर्घेत्पादि देशकालौ स्मृत्वा अर्घेत्पादि॰ अमुकगो
त्राणां मातृ पितामहीप्रपितामहीनां नांदीमुखीनां तथा अमुकगोत्राणां पितृ पितामह
प्रपितामहानां नांदीमुखानां पुरूरवार्द्रवाणां तथा अमुकगोत्राणां मातामह प्रमातामह वृ
द्धप्रमातामहानां नांदीमुखानां पुरूरवार्द्रवाणां पार्वणविधिना श्राद्धदपिकश्राद्धमहं क
रिष्ये॥ सत्यवसुसंज्ञकानां विश्वेषां देवानां इदमासनं॥ हस्तपः॰ उपयह विष्ट॰॥ गोत्राणां पि
तृपितामहप्रपितामहानां नांदीमुखानां इदमासनं हस्तपः॰ उपयह विगोत्राणां मातामहप्रमा
तामहवृद्धप्रमातामहानां नांदीमुखानां इदमासनं मिस्मादि सत्यवसुसंज्ञकान् विश्वान्देवान्॥ एषः॰